# Pramāṇāntarbhāva

By

Funders: Deutsche Forschungsgemeinschaft and The National Endowment for the Humanities
Principal: Birgit Kellner
data entry by: Aurorachana, Auroville
prepared for SARIT by: Liudmila Olalde

## Edition Statement

## Publication Statement

Availability: restricted
Copyright Notice:
Copyright 2016 SARIT
SARIT assumes no responsibility for unauthorised use that infringes the rights of any copyright owners, known or unknown.

## Source Description

| | |
|---|---|
| Title: | Pramāṇātarbhāva |
| Author: | |
| Editor: | Satīndra CandraNyāyācārya |
| Publisher: | The Asiatic Society |
| Place of Publication: | Calcutta |
| Date: | 1969 |
| Note: | With English Introduction by Gaurināth Śāstri. |

## Encoding Description

## Editorial Description

Line breaks: In the source file, there were two types of line breaks: returns (and possible surrounding space) and hyphens+returns. These were replaced with lb-elements. The ed-attribute "nya" refers to Nyāyācārya's edition.
Double quotes were replaced with quote-elements.
Single quotes were replaced with q-elements.
Square brackets were replaced with hi rend="squarebrackets".
Round brackets were replaced with hi rend="brackets".
Bold characters were enclosed in hi rend="bold".
Suspension points (…) were enclosed in supplied reason="gap".
The footnotes were encoded as note-elements with their corresponding n-attribute. The footnote 19-3 has no corresponding footnote reference. It was left at the end of the page and was given the attribute place="bottom"

Nyāyācārya's edition has a list of corrections on the last page. These corrections have been encoded with the tags choice,sic, and corr. Page and line numbers of each correction are given in the n-attribute. Thus, choice n="25.20" refers to the correction on page 25, line 20.
In three cases the corrections introduced by SARIT differ from those listed in Nyāyācārya's edition (a @resp has been added to the corresponding corr-elements):

12.21 and 13.16: The final -म् (in -उपमानम्) was not changed to -स्.
17.10: उपमान॰ was corrected to: इत्युपमान॰ and not, as in the list of corrections, to इति पमान॰.
3.7: The mistake had already been corrected in the edition. So it was not necessary to make any changes.

## Revision Description

| | |
|---|---|
| 2016-05-27 | Corrected the following footnotes:<br>Footnote reference 10-3 (second occurence) corresponds to note 10-4: new number 10-4 |

Footnote reference 10-4 corresponds to note 10-5: new number 10-5
Footnote reference 10-5 corresponds to note 10-6 (first one): new number 10-6a
Footnote reference 10-6 corresponds to note 10-6 (second one): new number 10-6b
Footnote reference 10-7 corresponds to note 10-7
Footnote reference 10-8 corresponds to note 10-8
Footnote reference 10-9 corresponds to note 10-10: new number 10-10.

# प्रमाणान्तर्भावः

/p. 1/

## प्रथमः परिच्छेदः

यस्य प्रज्ञाप्रकाशः कवलयति जगच्चक्रमेवाकलङ्कः
सत्त्वार्थं वा विधातुं यदपर उदयी नासमर्थोऽ [1] कलङ्कः ।
तं [2] नत्वा स्वार्थसम्पत्सुहितमनुपमो मञ्जुवाग्यो न दीनः
प्रत्यक्षं वानुमावेत्यत उदितमिदं येन तुल्यो न [3] दीनः ॥

प्रत्यक्षं चानुमानं च प्रमाणमिदमेव हि ।
प्रमाणसंप्लवायोगात् प्रमेयद्वयसंगतेः ॥

शब्दादिकं प्रमाणं हि भ्रान्तिमात्रात्तदन्यथा ।
प्रमाणलक्षणायोगात् प्रमाणाभं बहिः [4] स्थितेः ॥

न भ्रान्तिमात्रप्रवारितप्रामाण्यः प्रमाणं प्रमाणाभासः [5] । अथ कथंचित् प्रामाण्यमुपपद्यते, तथा सत्यनुमानलक्षणसंभवान्न प्रमाणान्तरं, साक्षात्करणवृत्तं हि प्रमाणं,--तदसंभवे तस्यैव सूचकं, तत्राव्यभिचार [6] प्रसादतः यदेव स्वार्थेऽस्तित्वमवबोधयति तत्प्रमाणमन्यथा संशयविपर्ययादेर्बोधादप्रमाणता [7] । यच्च साक्षादुपलभ्यते तदेवास्ति, उपलम्भ एव सत्तेति प्रतिपादनात् । न तत्र संदेहविपर्ययावनुपलभ्यमान एव तयोर्नियतत्वात् । तस्मादुपलभ्यमस्ति ।

यत्र चोपलभ्यमानतायाः साक्षात्करणलक्षणायाः प्रतिबन्धतो निश्चयस्तदपरमस्तीति नियमस्तेन द्वयमेव प्रमाणम् । तत्रार्थापत्त्यादीनां तथात्वाभावादप्रमाणतेति संक्षेपार्थः । अथ सत्तायोगादेवंप्रकाराभावेऽपि तदस्तीति व्यपदिश्यते तदसत्--

उपलभ्यता न यस्यास्ति सत्तायोगगतिः कथम् ।
उपलभ्यभावो यस्यास्ति सत्तायोगो वृथा परः ॥

अन्यथा खरशृङ्गादेः [8] सत्तायोगो न किं मतः ।
अवस्तुत्वान्मोपगच्छेद् वस्तुत्वे तेन किं पुनः ॥

/p. 2/

न च दृश्यस्य वस्तुत्वमुपलम्भ [9] विनाकृतम् ।

---

1 Ms. ऽकलं कः ।
2 Ms. तन्नत्वा ।
3 Ms. न दीनः ।
4 Ms. वहि ।
5 Ms. प्रमाणाभावः ।
6 Ms. अव्यभिचारः प्रसादतः ।
7 Ms. संशयविपर्ययादबोदादप्रमाणता ।
8 Ms. स्वरशृङ्गादेः ।
9 Ms. उपलम्भं विना कृतम् ।

उपलम्भे तदेवास्य वस्तुत्वमपरेण किम् ॥

तस्मात्सत्त्वोपलभ्यत्वं प्रत्यक्षाभं [10] तदन्यतःथा ॥

प्रत्यक्षपूर्वादेवानुमानात्तत्तत्प्रमाद्वयम् ।
अन्यथा प्रतिपत्तिस्तु न तस्याव्यभिचारिणी ॥

प्रत्यक्षस्मरणाकारव्यतिरिक्ता च [11] नास्ति धीः ।
असंबद्धा [12] स्मृतिः सर्वा प्रमाणं चेत् प्रमाऽखिला ॥

संबद्धा चेत् तदा दृष्टा तत्र देशे च साऽनुमा ।
सामान्याकारता शब्दादपि सा यदि गम्यते ॥

प्रमाणं [13] तदपि प्राप्तमनुमानवदेव हि ।
तथोपमानार्थापत्त्यादि ततोऽ [14] युक्तं प्रमाद्वयम् ॥

शब्दादेरपि यद्वित्तिः परोक्षार्थस्य विद्यते ।
ततोऽनुमानादेवास्य वित्तिरि [15] त्यतिसाहसा ॥

तथाहि कुरु {किञ्चि भावत्त्वं [16] नायां}[किञ्चित् त्वं भावनायां] मतिं [17] सदा ।
नवानेन विनार्थेन व्यवहारः प्रसिध्यति ॥

न च वैदिकवाक्यार्थं विना स्वर्गादिसाधनम् ।
नास्या [18] प्रमाणता तेन स्वर्गादिफलभागिनः [19] ॥

अथानुमानतः साध्यः परलोको भवत्यसौ ।
नात्र हेतुः क्वचित्सृष्टः संबन्धग्रहणम् न हि ॥

सिद्धेऽपि वा परे लोके कर्मणां नियमः कुतः ।
तस्मादागम [20] एवेष्टः स चेदस्त्वनुमा वृथा ॥

परलोकोऽकृतोऽसिद्धस्तत्संबन्ध [21] श्च दृक्कृतः ।
तस्मादागमतः [22] सर्वं परलोकस्य वेदनम् ॥

उपमानादि सर्वं च नानुमालक्षणान्वितम् ।
ततः प्रमान्तरास्तित्वे कथं द्वे एव ते इति ॥

---

10 Ms. प्रत्यक्षाभकारं तदन्यत् ।
11 Ms. व्यतिरिक्तावनास्ति धीः ।
12 Ms. असंबन्धा ।
13 Ms. प्रमाणन्तदपि ।
14 Ms. ततो युक्तं ।
15 Ms. रत्यति साहसा ।
16 Ms. किंचित्संभावनायां ।
17 Ms. मति ।
18 Ms. नात्राप्रमाणता ।
19 Ms. भागिनी ।
20 Ms. ततस्मागम एवेष्टव्यः ।
21 Ms. स्तत्संबन्धस्य ।
22 Ms. तस्मादावगतः ।

/p. 3/

प्रमाणान्तरमनुमानाच्छब्द इत्यन्यथा भण्यते[23] --।
कृतकत्वादिवत्स्वार्थमन्याऽपोहेन भाषते ।
उत्क्रमे तत्र संबन्धः परलोके न सिध्यति ॥

प्रामाण्यं च विवक्षायामिति पश्चाद्वदिष्यते ।
लौकिको व्यवहारस्तु वाक्यार्थविषयः सदा ॥

पदेन व्यवहारस्तु न लोकस्य कदाचन ।
वाक्यवाक्यार्थयोः स[24] र्गापूर्वत्वाद्योगविन्नहि ॥

तस्मादपोहविषयः कथं नाम ध्वनिर्मतः ।
अथापि पदतद्वाच्यसंबन्धस्य प्रसिद्धता ॥

ततोऽनुमानं संबन्धग्रहणे सति किं न तत् ।
तदयुक्तं पदस्यापि न प्रमाणत्वमिष्यते ॥

पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते ।
अन्वितार्थाभिधानं च सर्वदा कैश्चिदिष्यते ॥

विपरीतार्थवाच्यत्वे पश्चात् संबन्धिता कुतः ।
उपात्तस्य कुतस्त्यागस्त्यागश्चेत्तद्वृथा पदम् ॥

अनन्वितार्थाभिधायां दशदाडिमवाक्यवत् ।
न नाम व्यवहारः स्यादसंबन्धाददृष्टितः ॥

अथापि पश्चात्संबन्धोऽनन्वितार्थेऽपि विद्यते ।
वाक्यार्थ एव तत्रापि वाक्यस्यास्तु प्रमाणता ॥

संबन्धाग्रहणं तत्र पूर्वमेवोपपादितम् ।
तस्मान्न वाक्यवाक्यार्थेऽनुमानं भवितुं क्षमम् ॥

पदार्थः सर्व एवेत्थं[25] पदार्थान्तरसंगतः ।
देवकम्बल एवासौ वाक्यार्थः कथमन्यथा ॥

अथ प्रकरणापेक्षाप्रतिपत्तिरिहान्यथा ।
पदाप्रकरणं नास्ति समप्रकरणे कथम् ॥

एवं शब्दान्तरासङ्गे दोषो वाच्यं प्रमाविदा ।
समानशब्दान्तरतः कथं नियतवेदनम् ॥

न च शब्दार्थसंबन्धस्तदुत्पत्त्यादिलक्षणः ।
वाच्यवाचकसंबन्धस्तत्र केवलमिष्यते ॥

---

23 Ms. प्रमाणान्तरमानुमानाच्छाब्दमित्यन्यथा भण्यते--।
24 Ms. सर्वा ।
25 Ms. वात्थ ।

/p. 4/

न च तस्यानुमानेऽस्ति हेतुभावः प्रमागतः ।
अनुमानं हि तादात्म्यतदुत्पत्तिसमन्वयात् ॥

धर्मे धर्म[26] विशिष्टे हि तत्प्रवृत्तिमदीक्ष्यते ।
तस्मादननुमानत्वं शब्दे प्रत्यक्षवद्भवेत् ॥

त्रैरूप्यरहितत्वेन तादृग्विषयवर्जनात् ।
तत्र शब्दे कुतो[27] यत्नोऽनुमानत्वप्रसिद्धये ॥

विषयोऽन्यादृशस्तावद्दृश्यते शब्दलिङ्गयोः ।
सामान्यविषयत्वं हि पदस्य स्थापयिष्यते ॥

धर्मी[28] धर्मविशिष्टश्च लिङ्गीत्येतच्च साधितम् ।
अर्थे धर्मिणि शब्दे च तत्र सिद्धेन साध्यता[29] ॥

नहि सिद्धस्य साध्यत्वं धर्मिणः क्वचिदिष्यते ।
अथ साध्यत्वमर्थस्य न ध्वनेः पक्षधर्मता ॥

अथ शब्दोऽर्थवत्त्वेन पक्षः कस्मान्न कल्प्यते ।
प्रतिज्ञार्थैकदेशो हि हेतुस्तत्र प्रसज्यते ॥

पक्षे धर्मिविशेषे हि सामान्यं हेतुरिष्यते ।
शब्दत्वं गमकं नात्र गोशब्दत्वेन-लिङ्गता ॥

नहि तेनास्ति संबन्धसिद्धिः सिद्धौ वृथानुमा ।
अथकालान्तरत्वेन युक्तः सोऽर्थः प्रसाध्यते ॥

कालान्तरस्थितिर्नैव श्रीहर्षादेः प्रसिध्यति ।
अथ वाक्यार्थ-साध्यत्वं न वाक्यार्थेन योगवित् ॥

पूर्वं तस्यानुमानत्वं कथमेवं प्रसिध्यति ।
तत्र पूर्वार्थसिद्धिर्हि वाक्यादेवोपजायते ॥

न वाक्यस्यानुमानत्वमेवं सिध्यति तत्त्वतः ।
न पदव्यतिरेकेण वाक्यं[30] नाम निरूप्यते ॥

पदार्थेष्वनुमाभाव[31] स्तत्र वाक्यार्थता कुतः ।
तथाच पक्षधर्मत्वं शब्दस्येह निरूप्यते ॥

न क्रियाकर्त्तृसंबन्धादृते संबन्धनं क्वचित् ।

---

26 Ms. धर्मिविशिष्टे ।
27 Ms. कृतो ।
28 Ms. अत्र "धर्मो" इति च संदिग्धलेखो दृश्यते ।
29 Ms. साध्यते ।
30 Ms. वाक्यन्नाम ।
31 Ms. भावो तत्र ।

राजा[32] भर्त्ता मनुष्यस्य {तेन राजा[33] स उच्यते}[तेन राज्ञः स उच्यते] ॥

/p. 5/

वृक्षस्तिष्ठति शाखासु ता वा तत्रेति तस्य ताः ।
देशेऽग्निमति धूमस्य कर्त्तृत्वं भवनं प्रति ॥

कार्यकारणभावादौ क्रिया सर्वत्र विद्यते ।
{नचानवगताकारः}[न चानव गताकारः] संबन्धः कश्चिदिष्यते ॥

{नचास्त्यसति}[न चास्त्यसति] संबन्धे षष्ठीतत्पुरुषोऽपि वा ।
तस्मान्न[34] पक्षधर्मोऽयमिति शक्या निरूपणा ॥

अन्वयोऽपि च[35] शब्दस्य प्रमेयेण निरूप्यते ।
व्यापारेण हि सर्वेषामन्वेतृत्वं[36] प्रतीयते ॥

यत्र धूमोऽस्ति तत्राग्नेरस्तित्वेनान्वयः स्फुटः ।
न त्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चयः ॥

भवेन्नित्यविभु[37] त्वाच्चेत्सर्वार्थेषु च तत् समम् ।
तेन सर्वस्य दृष्टत्वाद्[38] व्यतिरेकस्य वा गतेः ॥

सर्वशब्दैरशेषार्थप्रति[39] पत्तिः प्रसज्यते ।
व्यतिरेकोऽपि शब्दस्य नैवार्थ[40] विषयः क्वचित् ॥

नार्थाभावेऽस्ति शब्दानामभाव इति निश्चयात्
प्रतीतेरिति चेदेषा प्रतिपत्तिर्न सर्वदा ॥ ॥

अत्रोच्यते--न युक्तोऽयं पूर्वपक्षः परोदितः ।
भावनार्था प्रतीतिर्हि सङ्केतादेव[41] जायते ॥

पदार्थावगतिः सर्वा न सङ्केतं विना क्वचित् ।
व्यञ्जकश्चेत्[42] स संकेतो न प्रतीपोऽन्यथेक्ष्यते ॥

नहि प्रतीपसंबन्धः संकेताद्व्यज्यते क्वचित्[43] ।
न[44] हि प्रत्यक्षतः सिद्धमन्यथा क्रियतेऽन्यदा ॥

---

32 Ms. राज्य ।
33 Ms. राहुः ।
34 Ms. तस्मात्र ।
35 Ms. अन्वयोऽनृच ।
36 Ms. मन्वेतृत्व ।
37 Ms. न्नित्यवितुत्वा" ।
38 Ms. दृष्टत्वात् ।
39 Ms. प्रतीपत्तिः ।
40 Ms. नैव्यर्थ ।
41 Ms. संकेतावंदेव ।
42 Ms. व्यञ्जकशवे ।
43 Ms. क्वचि ।
44 Ms. न्न ।

प्रत्यक्षेण हि तत्रार्थप्रतीतिरिति युक्तिमत् ।
संकेतस्यान्यथाभावे कथमन्यार्थसंगतिः ॥

नानार्थता चेत् सर्वत्र प्रतीतिः[45] संकुला भवेत् ।
न च तस्मात् स्वरूपस्य प्रतीतिर्वस्तुनः क्वचित् ॥

/p. 6/

इच्छयाह्य[46] नयात्सर्वो यत्र तत्र प्रवर्त्तते ।
सर्वस्य सर्वसंबन्धे दोषः प्रागेव दर्शितः ॥

संबन्धस्य च या व्यक्तिः संबन्धकथनं हि तत् ।
नापौरुषेये कथनादर्थवत्ता विनिश्चिता ॥

न च प्रमाणं पुरुष उपदेष्टा प्रतीयते ।
अनादिरेष संबन्ध {इति सात्व[47] परंपरा}[इति सात्वपरस्परा] ॥

पदार्थस्याप्रसिद्धौ च वाक्यार्थे सत्यता कुतः ।
तथापि स्यात्पदार्थानां विपर्यासो नरोद्भवः ॥

वेदे तु पुरुषाभावाद्विपर्यासक्रिया कुतः ।
{नराणामाशयेदुष्टे}[नराणामशये दुष्टे] विपर्यासो हि दृश्यते ॥

वेदस्य[48] न नरः कर्त्ता विपर्यासो[49] ऽस्त्वसौ कुतः ।
अत्रापि परिहारोऽयमुच्यतेऽन्यैर्विलक्षणैः ॥

यथा नात्र विपर्यासः संभवी पुरुषाद्विना ।
अथ स्वाभाविकस्तत्राऽविपर्यासो न कारणात् ।
तथा स्वाभाविकस्तत्र विपर्यासोऽप्यकारणात् ॥

विपर्यासस्तु वेदेऽपि पदार्थानां समीक्ष्यते ।
आत्माकाशादिकस्तत्र पदार्थो[50] ऽसत्य एव हि ॥

अथापि कुरु किंचित्त्वमितिदृग्व्यवहारभाक् ।
प्रमाणान्तरदृष्टोऽर्थस्तत्र तत्र प्रतीयते ॥

ततो निश्चित्य तस्यार्थं प्रवर्त्तन्ते विचक्षणाः ।
वेदे तु न प्रमार्थत्वं कथमत्र प्रवर्त्तताम् ।
स एव तत्र मानं चेत् न तस्यास्ति प्रसिद्धता ॥

अथापि वेदादर्थस्य प्रबोध उपजायते ।
अवेदादपि किं[51] नास्ति किं वा तत्र विशेषणम् ॥

---

45 Ms. प्रतीतिर्हि ।
46 Ms. इत्सयासनयात्सर्वो ।
47 Ms. सान्व ।
48 Ms. वेदस्य हि न नरः ।
49 Ms. विपर्यसोस्त्वसौ ।
50 Ms. पदार्थो सत्य ।

प्रबोधो वा विकल्पेन नादृष्टार्थ[52] प्रकाशकः ।
अदृष्टकल्पनामात्रात्तदस्तीत्यतिसाहसम् ॥

अथापि निश्चितः सोऽर्थ इति तत्र प्रमाणता ।
निश्चयोऽपि न सर्वस्य तस्मादेवोपजायते ॥

/p. 7/

कस्यचिन्निश्चयादेव प्रामाण्ये सर्वमानता ।
अपौरुषेयतो वाक्यान्निश्चयस्य प्रमाणता ॥

पौरुषेयात्तु[53] वचनादेवं वेदे नियम्यते ।
अपौरुषेयादपि हि नैवमर्थः प्रतीयते ॥

वेदादेव विकल्पार्थ[54] -प्रतीतिरिति तत्त्वधीः ।
पृथग्[55] व्याख्यानतो वेदात् क्वचिन्नार्थः प्रतीयते ॥

एवं व्याख्यातमन्यस्मिन् मयाप्येवमिति स्थितिः ।
अल्पाभ्यासात्तु सर्वत्र निश्चयस्य समागमः[56] ॥

देवदत्तानयेत्यादिवाक्यार्थस्यास्ति दर्शनम् ।
अथापि नास्ति वाक्यार्थे प्रत्यक्षप्रत्ययोदयः ॥

तेन वाक्यैकगम्योऽसावेवं सति न योगवित् ।
ततश्च वाक्य[57] वाक्यार्थसंबन्धग्रहणं कथम् ॥

पदार्थसंबन्धगतौ वाक्यार्थप्रतिपद् यदि ।
संबन्धोऽ[58] स्यास्त्यसत्योऽपि नदीतीरफलादिकः ॥

स तत्र नरयोगाच्चे[59] दत्र नास्तीति का प्रमा ।
पुरुषाभावतस्तत्र सोऽपि नास्तीति का प्रमा ॥

पुरुषाच्च विना तत्र संबन्ध इति साहसम् ।
ततोऽर्थलाभो यदि किमनर्थस्यापि नेष्यते ॥

यथा सम्बन्धिता नास्ति तथाऽसम्बन्धितापि न ।
किं च संकेतकरणे कोऽर्थो वाच्यार्थसंगतेः[60] ॥

---

51 Ms. किंन्नास्ति ।
52 Ms. तादृश्यार्थ ।
53 Ms. पौरुषेया तु ।
54 Ms. विकल्पार्थ° ।
55 Ms. किथग ।
56 Ms. समागमो ।
57 Ms. वाक्यावाक्यार्थ° ।
58 Ms. संबन्धोऽस्त्यसत्योऽपि । छन्दोभङ्गभयादत्र सम्बन्धोऽस्ति ह्यसत्योऽपि इति वा पाठः कल्पनीयः ।
59 Ms. नरयागश्चत् अत्र ।
60 Ms. संगतिः ।

तत्किं तस्य च सद्भावे वाच्यस्यार्थस्य संभवः ।
अर्थशून्यो न शब्दस्य प्रयोगः स्यात्तथासति ॥

न भवत्यर्थशून्यश्चेत् सर्वत्रार्थस्य संभवात् ।
पदार्थः सर्वदाऽस्त्येव सामान्यं वाच्यमिष्यते ॥

सामान्यं च पदस्यार्थस्तत्र न व्यभिचारिता ।
नैतदस्ति यदा नैवं वाच्यवाचकतेष्यते ॥

/p. 8/

कथं कुतः [61] क्व वेत्येवं संदेहस्यानिवृत्तितः ।
सामान्ये [62] नैव संदेह इति चेत् क्व भवेदसौ ॥

विशेष इति चेत् कस्मात् तस्य तेन व्यपेक्षणात् ।
अर्थादेव स संदेहः पदात् स्वार्थे [63] विनिश्चयः ॥

नन्वर्थकृतसंदेहं स्याद् वाक्यमप्रवर्त्तकम् ।
पदवत्सर्वसंदेहान्न स्याद्वाचकता क्वचित् ॥

देवदत्तादिवाक्ये हि तत्पदार्थकदम्बकम् ।
स्वकारणादिसापेक्षमिति संदेहविद्भवेत् ॥

अभिप्रेते न संदेह [64] इतिवाक्यात् प्रवर्त्तनम् ।
अवाचकं पदं प्राप्तमभिप्रेताविनिश्चयात् ॥

सामान्यप्रतिपत्तिस्तु विप्लवो व्यक्तत्यनन्वये ।
न च व्यक्तिविनाभूत{सामान्यप्रतिपत्कचित्}[सामान्यप्रतिपत् क्वचित्] ॥

वर्णसंस्थानभासे च सामान्यस्य न भासनम् ।
तदेव च न सामान्यं व्यावृत्तत्वेन तद्ग्रहात् ॥

नह्यन्यवर्णसंस्थानग्रहणेऽन्यस्य वेदनम् ।
तस्माद्विशेषसंदेह [65] एव सामान्यमीक्ष्यते ॥

तस्य संदेहकारित्वे वाच्याऽसंदिग्धता कुतः ।
अवाचकं ततो वाक्यं कुतस्तस्य प्रमाणता ॥

आत्मादिकपदार्थश्च व्ययायैव [66] च दृश्यते ।
अपौरुषेयतआ पूर्वा [67] यदि नामास्ति तत्त्वतः ॥

---

61 Ms. कुवेत्येवं ।
62 Ms. न सामान्येनैव ।
63 Ms. स्वार्थो विनिश्चयः ।
64 Ms. संदेहे ।
65 Ms. संदेहे ।
66 Ms. व्यवायैव ।
67 Ms. पूर्वी ।

विपरीतार्थसंबन्धो नेति केन प्रतीयते ।
नरादसत्यतेत्येवं सत्यतापि नराद् भवेत् ॥

स्वतन्त्र एव संबन्ध इति न क्वचिदीक्ष्यते ।
अग्निर्हिमस्येति वाक्ये दृश्यमानः कथं न सः ॥

दृश्यमानोऽपि नैवासौ सत्यतामधिगच्छति ।
न भवत्येष शब्दार्थो भरतारणिशब्दवत् ॥

पदार्थनिश्चये हि स्याद् वाक्यार्थस्य विनिश्चयः ।
/p. 9/
पदार्थसत्यतायां वा यः प्रतीतः स एव किम् ।
वाक्यार्थः कल्पितो यस्मात् पुरुषैरेव दृश्यते ॥

उन्मत्त[68] वाक्यतो नास्ति संबन्धे सत्यता क्वचित् ।
पण्डितैः कल्प्यते काचित् स्वानुरूपप्रभावतः ॥

उन्मत्तत्वेन संबन्धं न स पश्यति शब्दयोः ।
वेदेऽपि नास्ति संबन्धवेदनाऽत्राप्यसत्यता[69] ॥

उन्मत्तत्वाद् यदा नास्ति तत्र संबन्धदर्शनम् ।
अपौरुषेये सुतरां न संबन्धस्य वेदनम् ॥

स्वाभाविकश्चेत् संबन्धः किं[70] न वेदे प्रकल्प्यते ।
संबन्धस्तत्र नास्तीति वेदेऽपिस्यात्कथं नु सः ॥

तस्मादुन्मत्तवचसि वेदे वाऽसौ न विद्यते ।
नरैः केवलमासाद्य मापाद्य इति सिद्धं समं[71] द्वयम् ॥

तस्मान्न शब्दादर्थस्य प्रतीतिः प्रतिबन्धतः ।
प्रतीपादिव नार्थस्य प्रत्यक्षेण प्रतीतता ॥

अप्रत्यक्षप्रतीतिस्तु कथमस्तीति गम्यते ।
किञ्च[72] वस्तु न संकेतं विना कस्यचिदीक्ष्यते ॥

तत्रार्थयोगः प्राग् दृष्टः पदार्थान्तरसंगतः ।
शब्दानां शब्दसंबन्धादस्मिन्नपि तथैव सः ॥

ततोऽनुमानमेवैतदबाह्येऽर्थे प्रवर्त्तते ।
विवक्षा रूढ एवार्थे शब्दप्रामाण्यमप्यतः ॥

वेदेऽपि तत्समानत्वादबाह्यार्थे प्रमाणता ।

---

68 Ms. उन्मत्ते ।
69 Ms. संबन्धो वेदाद त्राप्यसत्त्वता ।
70 Ms. किन्ना ।
71 Ms. समद्वयम् ।
72 Ms. किञ्चस्तु । कल्पिस्तु इति वा पाठः । कल्पितस्तु इत्यपि संभाव्यते ।

अनादिरेष संबन्ध इति सा त्वपरंपरा ॥

ततः प्रतीत्यभावे च न संबन्धः प्रसिध्यति ।
अर्थप्रतीतेः प्रामाण्यं न बाह्येऽर्थे प्रसिध्यति ॥

घुणाक्षरत्ववद्वेदे तन्नार्थस्य प्रसिद्धता ।
अथापि घुणवर्णानां नेयत्ता विद्यते क्वचित् ॥

अतएव हि तत्रापि पौरुषेयत्वमिष्यताम् ।
यथा न घुणवर्णत्वं तथा नापौरुषेयता ॥

/p. 10/

अपौरुषेयमप्येवं कथं नाम प्रपञ्चवत् ।
ततः कृतक एवायमिति वेदः प्रतीयताम् ॥

पुरुषातिशयासिद्धिर्न तत्रापि प्रमाणता ॥ छ ॥

विषयोऽन्यादृशस्तत्र य उक्तो लिङ्गशब्दयोः ।
तेनाप्रमाणता शब्दे सर्वथैव प्रसिध्यति ॥

विकल्पविषयत्वं हि शब्दस्येति प्रसाधितम् ।
धर्मी धर्मविशिष्टस्तु साध्य उक्तोऽनुमानतः ॥

शब्दस्यापक्षधर्मत्वे न बाह्येऽर्थेऽस्ति हेतुता ।
नहि धर्मिण्यसिद्धत्वे धूमादर्थः प्रसिध्यति ॥

धर्मिसंबन्धितायां हि प्रत्यक्षेऽपि प्रमाणता ।
न चा[73] धिष्ठानता नैव प्रत्यक्ष स्य◌ा प्रसाधनम्[74] ॥

प्रत्यक्षेऽप्यनुमानत्वं कया [75] वा कलयेष्यते ।
त्रैरूप्यरहितत्वे च न प्रत्यक्षस्य सिध्यति ॥

स्वरूप एव प्रत्यक्षमनुमानत्ववर्जितम् ।
अर्थवत्त्वेन शब्दस्य पक्षत्वपरिकल्पने ।
प्रतिज्ञार्थै[76] क देशत्वं न शब्दत्वे प्रस[77] ज्यते ॥

तथाहि शब्दः शब्दत्वात् पूर्वशब्दवदेव हि ।
समीपार्थेन संबद्धो[78] धूमो धूमतया यथा ॥

गोशब्दत्वमसिद्धं चेत्[79] लता-तालादि वाचिनाम् ।

73 Ms. निचा । "नैवाधिष्ठानता" इति संभाव्यते ।
74 Ms. प्रस्नाधनम् ।
75 Ms. विकलयिष्यते ।
76 Ms. प्रतिज्ञार्थैक° ।
77 Ms. प्रसिज्यते ।
78 Ms. संबन्धो ।
79 Ms. गोशब्दमप्रसिद्धत्वं चेत् ।

विशेषार्था प्रसिद्धिः स्यात् तस्माद् युक्ता विशेषता ॥

सामान्येन हि वाक्यार्थसंबन्धः[80] सिद्ध एव नः ।
विशेषेण तु नैवास्ति क्वचित् संबन्धसिद्धता ॥

वाक्यस्यैवानुमानत्वमेवं नास्तीत्यसंगतम् ।
संबन्ध[81] साधकः शब्दो वाक्यमित्यभिधीयते ॥

समुदायस्य धर्मित्वमेकदेशस्य हेतुता[82] ।
संबन्धस्य च साध्यत्वं कस्मान्नास्त्यनुमानता ॥

/p. 11/

क्रियाकारकसंबन्धादृते संबन्धनं कथम् ।
राजा भर्त्ता मनुष्यस्य पदं वाक्यस्य पूरकम् ।
वृक्षस्तिष्ठति शाखासु पदं वाक्ये न किं तथा ॥

देशेऽग्निमति धूमस्य कर्त्तृत्वं भवते[83] यथा ।
तथा वाक्येऽपि किं नास्ति पदस्येति निरूप्यते[84] ॥

नचानवगताकारः संबन्धो नापि[85] लक्ष्यते ।
तेनास्ति सति संबन्धे षष्ठीतत्पुरुषोऽपि वा ॥

ततश्च पक्षधर्मोऽयं शब्दप्राप्तोऽन्यशब्दवत् ।
अन्वयो न च शब्दस्येत्यादि सिद्धप्रसाधनम् ॥

वाह्यार्थे नान्वयः क्वापि विनार्थं शब्द ई[86] क्ष्यते ।
भवे[87] न्नित्यविभुत्वाच्चेत् सर्वार्थेऽप्यन्वयस्तथा ॥

ततः सर्वार्थसिद्धत्वे सर्वशब्द-समागमे ।
वाच्यवाचकसंबन्ध उक्ते सा त्वपरंपरा[88] ॥

व्यतिरेकोऽपि शब्दस्य नास्तीति प्रतिपादितम् ।
अन्यथा संविदानोऽपि विवक्षत्यन्यथा यतः ।
तस्मादेकान्ततो नास्ति पुं[89] वाक्यात् तद्धियां[90] गतिः ॥

भ्रान्तस्यान्य[91] विवक्षायामन्यद्वाक्यं च दृश्यते ।

---

80 Ms. संबधुः ।
81 Ms. संबन्धः ।
82 Ms. हेतुना ।
83 Ms. भवते यथा । भवतं यथा ।
84 Ms. निरूप्यतं ।
85 Ms. संबन्धोन्नापि ।
86 Ms. इक्ष्यते ।
87 Ms. भवोन्नित्य° ।
88 Ms. वात्वपरम्पग ।
89 Ms. पुम्वाक्यात् ।
90 Ms. धियाङ्गतिः ।
91 Ms. भ्रान्तस्यात्य° ।

यथाविवक्षमित्येतत् तस्मान्नैव प्रवर्त्तते ॥

अभ्रान्तत्वे परिज्ञाते अभ्यासादे[92] विकल्पतः ।
समानसमयत्वे च विवक्षार्थः प्रतीयते ॥

लोकस्य व्यवहारोऽयमेवमेव व्यवस्थितः ।
अन्यथा सर्वमेव स्यात् प्रमाणं नेति साधितम् ॥

व्यवहारं विना नास्ति ब्रह्मलोकेऽपि जन्मभाक् ॥

इत्यर्थ[93] सङ्गि व्यवहारसिद्धं, शाब्दं, निजार्थेऽनुमिति प्रमाणम् ।
बाह्ये तु नैवास्य परं प्रमाणं यथाकथञ्चिज्जगतामिहास्था ॥

{प्रमाणान्तर्भावे शाब्दः}[इति प्रमाणान्तर्भावे शाब्दः] प्रमाणान्तर्भावः प्रथमः परिच्छेदः ॥

# द्वितीयः परिच्छेदः

/p. 12/

उपमापि प्रमा कैश्चिदिष्यते व्यक्त[94] बुद्धिभिः ।
सादृश्येन परिच्छेदः परोक्षेऽर्थे न तां विना ॥

सादृश्यस्य च वस्तुत्वं न शक्यमप[95] बाधितुम् ।
भूयोऽवयवसामान्ये योगो जात्यन्तरस्य तत् ॥

उपमापि हि सादृश्ये परोक्षे वित्तिरीक्ष्यते ।
नानुमालक्षणं तत्र प्रथमं सदृशाग्रहात् ॥

तस्माद् यत् स्मर्यते तत् स्यात्[96] सादृश्येन विशेषितम् ।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥

प्रत्यक्षेणावबुद्धेऽपि सादृश्येन गवि स्मृते ।
विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता ॥

प्रत्यक्षेऽपि यथा देशे स्मर्यमाणे च [97] पावके ।
विशिष्ट-विषयत्वेन नानुमानाप्रमाणता ॥

नवै तस्यानुमानत्वं पक्षधर्माद्यसंभवात् ।
प्राक् प्रमेयं च सादृश्यं न धर्मत्वेन मीयते ॥

---

92 Ms. अभ्यासादे विकल्पतः ।
93 Ms. इत्यर्थसि ।
94 Ms. व्यक्ष ।
95 Ms. मवबाधितुम् ।
96 Ms. तस्योत्सादृश्येन विशेषतम् ।
97 Ms. यावके ।

गवये गृह्यमाणं च न गवामनुमा[98] पकम् ।
प्रतिज्ञार्थैकदेशत्वाद् गोगतस्य[99] न लिङ्गता ॥

गवयस्याप्यसंबन्धात् न गोर्लिङ्गत्वमृच्छति[100] ।
सादृश्यं न[101] च सर्वेण पूर्वं दृष्टं तदन्वयि[102] ॥

एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने[103] ।
सादृश्येन सहैवास्मिंस्तदैवोत्पद्यते मतिः ॥

{मीमांसकोपमानम्}[इति मीमांसकोपमानम्] ॥ छ ॥

नैयायिका स्त्वन्यथैव[104] वर्णयन्त्यस्य लक्षणम् ।
प्रसिद्धेन हि साधर्म्यादुपमा साध्यसाधनम् ॥

/p. 13/

श्रुतातिदेशवाक्योऽयमीक्षते[105] गवयं यदा ।
प्रत्यक्षैव हि सा वित्तिस्तेनायं सदृशो न तु ॥

समाख्याया हि संबन्धमपूर्वं प्रतिपद्यते ।
अयं स गवयस्तेन तदानीं प्रतिपादितः ॥

यथामुद्गस्तथा मुद्गपर्णी माषो यथा परा ।
नामनामवतोर्योगे[106] व्यवहारार्थमीक्ष्यते ॥

उपमानस्य विषय एवमन्योऽपि गम्यताम् ।
अतिदेशवाक्यतो[107] नाम प्रागेवैषा गतिर्भवेत् ॥

तथापि न विशेषेण पूर्वयोगस्तथागतः ।
उपयुक्तोऽयं[108] मानो हि तुल्यार्थग्रहणे सति ॥

विशिष्टविषयत्वेन संबन्धं प्रतिपद्यते ।
सविकल्पकतो नेदं[109] प्रत्यक्षमनुमा पुनः ॥

त्रैरूप्यरहितत्वेन विशेषः[110] स पुरोदितः ।
पिण्डस्य हि विशेषेण संप्रत्येव प्रतीयते ॥

---

98 Ms. मायकम् ।
99 Ms. योगतस्य ।
100 Ms. गीलिङ्गत्वमर्च्छति । नैयायिकोपमानप्रसङ्गे "मिच्छति" इति पाठो दृश्यते ।
101 Ms. सादृश्यन्त ।
102 Ms. तदन्वपि ।
103 Ms. वनो ।
104 Ms. थैवोपवर्णयंति अस्य लक्षणं ।
105 Ms. मीक्ष्यते ।
106 Ms. योगे ।
107 Ms. अत्र अक्षराधिक्यात् छन्दोदोषः ।
108 Ms. उपयुक्तोऽय ।
109 Ms. नेदमुप्रत्यक्षामनुमा पुनः ।
110 Ms. विशेष ।

संबन्धः संज्ञयेत्येवं[111] नान्वयव्यतिरेकिता ॥

{नैयायिकोपमानम्}[इति नैयायिकोपमानम्] ॥

अत्रोच्यते च सादृश्यं प्रत्यक्षेण प्रतीयते ।
पुरोद्वयं पश्यतो हि प्रत्यक्षादेव निश्चयः[112] ॥

ततः परोक्षे[113] स्मरणमात्रमेवोपजायते ।
त[114] एवावयवा यत्र दृष्टिस्मरणगोचराः[115] ॥

यदापि न द्वयं दृष्टं तस्यैव स्मरणा[116] त्तदा ।
त एवावयवास्तत्र स्मर्यन्ते प्रत्यभिज्ञया ॥

प्रत्यभिज्ञानमेतच्च व्यवहारेऽनुमैव न ।
तद्रूपदर्शनादेव तत्त्वव्यवहृतिः परा ॥

/p. 14/

अनादिव्यवहारोऽयमिति न प्रथमा गतिः ।
प्रत्यक्षं प्रत्यभिज्ञेयं तैरेवाभ्युपगम्यते ॥

अनादिवासनासङ्गद्वयं तु व्यवहारिणः ।
अपूर्वं[117] तत्त्वतो नास्ति प्रमेयं व्यवहारतः ॥

प्रामाण्येऽस्याः प्रमाणं हि भवतः सप्रमादकम्[118] ।
अनेनासौ विसदृशः पूर्वस्मादमुकः[119] परः ॥

मध्यमः पृथुरत्यन्तदीर्घः कर्कश इत्यपि ॥

अथ प्रत्यक्षमेवैषानुमानमियमेव[120] वा ।
सादृश्यस्य परिच्छेदे किं प्रमाणान्तरं मतम् ॥

यथा सादृश्यवस्तुत्वं[121] न शक्यमपबाधितुम् ।
प्रत्यक्षत्वमपि प्राप्तं किं शक्यं बाधितुं त्वया ॥

भूयोऽवयवसामान्ययोगो जात्यन्तरस्य यः ।
गवये व्यक्तदृष्टोऽसौ पूर्वं गव्यपि वीक्षितः[122] ॥

---

111 Ms. संज्ञायेत्येवं ।
112 Ms. निश्चीयते ।
113 Ms. स्मरणं ।
114 Ms. तत ।
115 Ms. दृष्टिः स्मरणगोचरः ।
116 Ms. स्मरणा तदा ।
117 Ms. अपूर्वन्तत्वतो ।
118 Ms. स प्रमादिकम् ।
119 Ms. अमुक ।
120 Ms. अनुमानमियमेवै वा ।
121 Ms. वस्तुत्वन्न ।
122 Ms. वीक्षित ।

यदा [123] ऽवयव सादृश्यं तदाप्रत्यक्षनिश्चितम् [124] ।
[125] तदेव गवयेनापि गोसादृश्यमनूनकम् ॥

एकस्य सदृशत्वं हि न पृथक् संप्रतीयते ।
अपरापेक्षया [126] नैव सादृश्यस्य प्रसिद्धता ॥

अनुमा [127] लक्षणास्तित्वं यथैवोपमितावह [128] ।
प्रमेयमपि नास्त्येव प्रत्यक्षं यन्न [129] भासते ॥

{व्यवहारेतु तस्याः किं}[व्यवहारे तु तस्याः किं] [130] नानुमालक्षणान्वयः ।
तस्माद् यत् स्मर्यते तत्स्यात् सादृश्येन विशेषितम् ॥

प्रमेयमुपमानस्य कथं स्मरण [131] संभवि ।
प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते [132] ।
विशेषस्यान्यतः सिद्धेरुपमानाप्रमाणता ॥

प्रत्यक्षे तु पुनर्देशे स्मर्यमाणे [133] ऽपि पावके ।
/p. 15/
विशिष्टविषयत्वेन नानुमानाप्रमाणता ॥

तच्च तस्यानुमानत्वं पक्षधर्मादिसंभवात् ॥

प्राक्प्रतीते च सादृश्ये तदन्यत्र प्रतीतितः ।
गवये तत् प्रतीतं हि गवि व्यवहृतं न किम् ॥

गवा तु नानुमेत्येतत् कस्योपालम्भ उच्यते ।
प्रतिज्ञार्थैकदेशत्वादात्मनो दूषणं परम् ॥

परेणानभ्युपगमात् परस्य तु न दूषणम् ॥

गवयस्या [134] प्यसंबन्धान्न गोलिङ्गत्वमिच्छति । [135]
यदि किं तावता शक्यमुपमानं प्रमान्तरम् ॥

सादृश्यमपि सर्वेण पूर्वं दृष्टं तदन्वयि ।
अवश्यं हि क्वचिद् दृष्टे सादृश्यप्रतिपत्तिमान् ॥

---

123 Ms. यया ।
124 Ms. निश्चित ।
125 Ms. न्तदेव ।
126 Ms. अपरापेक्षानैव ।
127 Ms. अनुमान ।
128 Ms. -वहम ।
129 Ms. सन्न ।
130 Ms. किन्नानुमा ।
131 Ms. स्मरणं संभवि ।
132 Ms. स्मृतम् ।
133 Ms. स्मर्यमाणोऽपि ।
134 Ms. गवयश्चा ।
135 अयं श्लोकः मीमांसकोपमाने एवमेवास्ति ।

एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने ।
सादृश्येन सहैवास्मिन् न तदोत्पद्यते मतिः [136] ॥

अपूर्वदर्शनात् तत्र केवलं स्मरणोदयः ।
पूर्वपराव्यक्तभावात् प्राग्दृष्टेर्व्यवहारधीः [137] ॥

सदृशोऽयमितिज्ञानं [138] वासनाबलसम्भवि ।
नहि काचिदसादृश्यप्रतिपत्तिरिहेक्ष्यते [139] ॥

कस्यचित् केनचित् क्वापि सोऽवश्यं सदृशग्रहः ।
न प्रमाणान्तरं [140] दृष्टमुपमानं विपश्चिताम् ॥

सादृश्यं हि न वस्तुभ्यो व्यतिरेकेण विद्यते ।
व्यवहारेऽनुमानं [141] तु नोपमाऽत्र प्रमान्तरम् ॥ छ ॥

नैयायिकोपमानं तु नानुमानात् पृथक् प्रमा ।
तथाहि तेन संबन्धः साध्यते नाम तद्वतोः ॥

स चास्येदमिति ज्ञाना [142] न्नोपमानं विनास्ति किम् ।
तथासंनिहितस्तत्र गवयस्तेन तत्र कः ॥

संकेतस्यावतारोऽस्ति नामेदमिति संभवि [143] ।
अथास्त्ययमपि न्यायः संकेतस्येति वर्ण्यते ॥

/p. 16/

तत्रातिदेशवाचैव संबन्धस्य विनिश्चयः ।
सदृशस्तस्य बुद्धिस्थो [144] यथैव प्रतिभासते ।
गवये [145] तत्र संकेतः सामान्येन गतो न किम् ॥

अतद्रूपपरावृत्ते [146] वस्तुमात्रे हि सर्वदा ।
संकेतो गृह्यते पुम्भिर्न विशेषस्य संभवः ॥

न विशेषः सदैवास्ति प्रत्यक्षप्रतिपत्तिभाक् ।
तत्र संकेतकरणं व्यर्थमेवोपजायते ॥

अयं स गवयार्थश्चेद् [147] विशेषेणेति गम्यते ।

---

136 Ms. मातिः ।
137 Ms. प्राक् दृष्टेः व्यवहारधीः ।
138 Ms. मिति विज्ञानं ।
139 Ms. कश्चिदसादृश्यप्रतिपत्तिरिहोत्यते ।
140 Ms. प्रमाणान्तराद्दष्टमुपमानं ।
141 Ms. मानन्तु ।
142 Ms. ज्ञाया ।
143 Ms. संभवी ।
144 Ms. बुद्धिस्था ।
145 Ms. गवयस्तत्र ।
146 Ms. सतद्रूपपरावृत्ते ।
147 Ms. गवयार्थश्चेत् ।

यदि न व्यवहारोऽस्ति संकेतग्रहणागतः ।
प्रत्यक्षदृष्टेः संकेतग्रहणेनापि किं तदा ॥

परं प्रति व्यवहृतौ सामान्यं स्यात्तथा सति ।
सामान्येन च संबन्धग्रहणादतिदेशतः--।
अयं स गवयः पश्चाद्विशेषमवगच्छति ॥

अनुमानमिदं मुख्यं सामान्यव्याप्तिपूर्वकम् ।
तत्र विशेषग्रहणं[148] धूमादग्न्यनुमानवत् ॥

महानसे हि संबन्धः सामान्येन प्रतीयते ।
पक्षधर्मत्वतः पश्चाद्विशिष्टाग्निपरिग्रहः ॥

सामान्येन हि संबन्धे विशेषेऽनुमितिः कथम् ।
अन्येन योगग्रहणे कथमन्यः प्रतीयते ॥

विचारितमिदं सर्वैर्वस्तुवृत्तं महारथैः ।
अतद्रूपपरावृत्तं[149] वस्तुसामान्यमुच्यते ॥

अन्तर्भाव्य विशेषं हि सामान्यव्याप्तिराप्यते ।
अवश्यं तत्र वस्त्वस्ति किंचिदेवाविशेषितम् ॥

तस्मादनुमितिन्यायः समस्त उपमास्वपि ।
अङ्गदी कुण्डली यस्तु[150] स राजेति प्रतीयताम् ॥

विशेषेण हि संबन्ध[151] प्रतीतौ किं प्रमान्तरम् ।
श्रृङ्गादिसामान्यगतेस्तेनायं सदृशः पुनः ॥

/p. 17/

श्रृङ्गादयोऽपि तैक्ष्ण्यादिभावतः सदृशात्मकाः ।
तैक्ष्ण्यमन्येन केनापि पर्यन्ते वासनैव हि ॥

कारणं सदृशत्वेन व्यवहारस्य गम्यताम् ।
तस्मादननुमानत्वं नोपमानस्य भाविकम् ॥

इति सर्वमिदं सुस्थमकारणमतः परम् ॥

इत्यनिन्द्यविधिना निरूपितं
नोपमानमनुमानतः परम् ।
एवमन्यदपि तेन गीयते
प्रज्ञया नहि स दृश्यतेऽधिकः ॥

148 Ms. विशेष षं तत्र ग्रहणं । अयं पाठोऽशुद्धः--विशेषे तत्रग्रहणमिति तु कथंचिद्भवितुमर्हति विशेषं तत्र गृह्णाति इति वा ।
149 Ms. परावृत्तम्वस्तु ।
150 Ms. यो तु ।
151 Ms. संबन्धं प्रतीतौ ।

{उपमानान्तर्भावो द्वितीयः परिच्छेदः}[इत्युपमानान्तर्भावो द्वितीयः परिच्छेदः] ॥ छ ॥

# तृतीयः परिच्छेदः

प्रमाणषट्क-विज्ञातो यत्रार्थोऽनन्यथाभवन् ।
अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता ॥

ननु दृष्टः[152] श्रुतो वार्थ इति भाष्यकृतो वचः ।
तत्कथं दृष्टिमात्रेण सार्थापत्तिर्निरूपिता ॥

दृष्टः पञ्चभिरित्यस्माद्भेदेनोक्ता श्रुतोद्भवा ।
प्रमाणग्राहिणीत्वेन यस्मात्पूर्वविलक्षणा ॥

तत्र प्रत्यक्षतो ज्ञात्रा देहदाहेन[153] शक्तिता ।
वह्नेरनुमिता[154] सूर्ये भा[155] नात्तच्छक्तियोगिता ॥

पीनो दिवा न भुङ्क्ते[156] चेत्येवमादि वचः श्रुतौ ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते ॥

गवयोपमिताया गोस्तज्ज्ञानग्राह्यशक्तता[157] ।
अभिधानप्रसिद्ध्यर्थमर्थापत्त्यवबोधिता[158] ॥

शब्दे वाचकसामर्थ्यात् तन्नित्यत्वस्य कल्पना ।
प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् ॥

गेहाच्चैत्रबहिर्भाव[159] सिद्धिर्या त्विह वर्ण्यते ।
/p. 18/
तामभावोत्थितामन्यामर्थापत्ति[160] मुदाहरेत् ।
पक्षधर्माद्यनङ्गत्वाद्भिन्नैषाऽप्यनुमानतः ॥

बहिर्देशविशिष्टेऽर्थे देशे वा तद्विशेषिते ।
प्रमेये यो गृहाभावः पक्षधर्मस्त्वसौ कथम् ॥

तदभावविशिष्टं हि गृहं धर्मो न कस्यचित् ।
गृहाभावविशिष्टस्तु तदासौ नैव गम्यते ॥

पूर्वं न चाविशिष्टस्य धर्मिणः स्यात् प्रमेयता ।

152 Ms. दृष्टश्रुतो ।
153 Ms. ज्ञाता देहाद्देहेन ।
154 Ms. रनुमितात् ।
155 Ms. पाना ।
156 Ms. नभुङ्क्तेत्येवमादि ।
157 Ms. गोस्तज्ज्ञानग्रह्य ।
158 Ms. मर्थाप त्रबोधिता ।
159 Ms. गेहाश्चै बवहिर्भाव ।
160 Ms. मदाहरेत् ।

न चात्र बाह्यदेशो वा चैत्रो वा गम्यते पुरा ॥

जीवतस्तु गृहाभावः पक्षधर्मोऽत्र कल्प्यते[161] ।
तत्संवित्तिर्बहिर्भावे[162] नव्यबुद्धौ[163] प्रजायते ॥

अग्निसत्तानपेक्षा हि धूमसत्ता[164] प्रतीयते ।
तद्ग्रहणस्य वेलायामग्न्यधीनत्ववित्न वा ॥

गेहाभावस्तु यः शुद्धो विद्यमानत्ववर्जितः ।
स मृतेष्वपि दृष्टत्वाद्बहिर्वृत्ते[165] न साधकः ॥

विद्यमानत्वसंसृष्टगेहाभावधियानया ।
गेहादुत्का[166] लितश्चैत्रो विद्येत बहिरेव हि ॥

गेहाभावत्वमात्रं[167] तु यत् स्वतन्त्रं प्रतीयते ।
न तावता बहिर्भावश्चैत्रस्यैवं प्रसिध्यति ॥

स्थिते सद्भावविज्ञाने गेहाभावधियाऽत्र तु ।
गेहादुत्कालिता सत्ता बहिरेवावतिष्ठते ॥

तेनात्र निरपेक्षस्य[168] व्यभिचारो मृतादिना ।
यस्य त्वव्यभिचारित्वं न ततोऽन्यत्प्रतीयते ॥

तस्मात् प्रत्यक्षतो गेहे चैत्राभावेऽप्यभावतः ।
ज्ञाने यत् तत्त्वविज्ञानं[169] तदेवेदं बहिः◌ःस्थितम् ॥

पक्षधर्मात्मलाभाय बहिर्भावप्रवेशितः ।
तद्विशिष्टोऽनुमेयः स्यात् पक्षधर्मत्ववादिभिः ॥

/p. 19/

पक्षधर्मादिविज्ञानं बहिः संबोधतो यदि ।
तैश्च तद्बोधनेत्येवमन्योन्याश्रयता च[170] तत् ॥

अन्यथानुपपत्तौ तु प्रमेयानुप्रवेशिता ।
ताद्रूप्येणैव विज्ञानान्न दोषः प्रतिभाति नः ॥

अविनाभाविता चात्र तदैव परिकल्प्यते ।
न प्रागवगतेत्येवं सत्यप्येषा न कारणम् ॥

---

161 Ms. कल्पते ।
162 Ms. बहिर्भावं ।
163 Ms. बुद्धोपजायते ।
164 Ms. चत्ता ।
165 Ms. बहिवृत्तेन ।
166 Ms. गेहादुत्तत्वात ।
167 Ms. मात्रन्तु ।
168 Ms. नरपेक्षस्य ।
169 Ms. विज्ञानन्तदेवेदं ।
170 Ms. य ।

गृहाभाव-बहिर्भावौ न च दृष्टौ नियोगतः ।
साहित्येन प्रमाणं हि तयोरन्य[171] न्न विद्यते ॥

अन्यथानुपपत्त्यैव ह्यने{नान्यत् प्रतीयते}[नान्यत्प्रतीयते] ।
अन्यत्प्रतीयते तच्चेत् साहित्यं न प्रतीयते ॥

तेन संबन्धवेलायां संबन्ध्यन्यतरो ध्रुवम् ।
अर्थापत्त्यावगन्तव्यः पश्चाद्वस्त्वनुमानता[172] ॥

अत्रोच्यते परोक्षार्थादन्यथानुपपत्तितः ।
परोक्षकल्पना सैव ह्यर्थापत्तिः परोदिता ॥

अन्यथानुपपन्नत्वं {तत्रासिद्धस्य नेक्षते}[तत्रासिद्धस्य नेक्ष्यते] ।
प्रमाणेन प्रसिद्धो यः स कथं नोपपत्तिमान् ॥

प्रसिद्धोऽनुपपन्नश्चेत्येतदत्यन्तदुर्घटम् ।
न दृष्टेऽनुपपन्ने[173] हि प्रसिद्धिर्भुवनत्रये ॥

यदि न स्यात् परोऽप्यत्र स्यादेवानुपपन्नता ।
{नचेत् साऽप्यत्र}[न चेत् साऽप्यत्र] नास्माकमत्यन्तानुपपत्तिधीः ॥

ननु चानुपपन्नत्वमेतदन्यव्यपेक्षया ।
प्रत्यक्षसिद्धं धूमादौ संबन्धग्रहणं विना ॥

{तथाचेदनुमानेन}[तथा चेदनुमानेन] किं कर्त्तव्यं परेण वः ।
अथ संबन्धबोधेन विना नानुपपत्तिधीः ॥

अर्थापत्तावपि तथेत्यर्थापत्तिर्वृथा तथा ।
कार्यहेतौ न दृष्टं चेत् संबन्धग्रहणं विना ॥

अन्यथानुपपन्नत्वमर्थापत्तौ तु दृश्यते ॥

नन्वर्थापत्तिरप्येषा कार्यादेवोपजायते ।
शक्तयः सर्वभावानां कार्यार्थापत्तिसाधनाः ॥

[174] /p. 20/

शक्तौ हिच समानायां संबन्धग्रहणं विना ।
ज्ञायतेऽनुपपन्नत्वं तत्र कः प्रतिषेधकः ॥

यो यथा गृह्यते भावः स तथैवोपपत्तिमान् ।
अन्यथा दृश्यमानं हि शक्तः कः कर्त्तुमन्यथा ॥

प्रतीतिरनुगन्तव्या पर्यन्ते सर्ववादिभिः ।

---

171 Ms. रन्यं न ।
172 Ms. पश्चाद्वस्त्वस्त्वनुमानता ।
173 Ms. ऽनुपपन्नं हिः ।
174 Ms. नातन्यप्रतीयते ।

प्रतीत्युत्क्रमणे वादी न वादी वादिसंसदि ॥

अत्रोच्यते,--यथा दृष्टपदार्थावगमे सति ।
शक्तेरकल्पनं प्राप्तं दृश्यन्तेच सशक्तिकाः ॥

यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ॥

अन्यथानुपपत्तिश्च भवत्यर्थमिति प्रति ।
तदेवास्या निमित्तं स्यात् जायते यदनन्तरम् ॥

इति यत् स्वयमेवोक्तं घटोऽयं स्फोटदूषणे ।
तत्कथं स्मर्यते नैवाचिरकालव्यतीतिमत् ॥

अथाप्यकल्पना स्फोटे शक्तिमात्रेण सिद्धितः ।
शक्तिं विना तु तत्कार्यं कुत एव भविष्यति ॥

कारणादेव तत्कार्यं वृथा शक्तेः प्रकल्पना ।
शक्तिं विना कथं कार्यमशक्तेरपि भाविकम् ॥

दृश्यतेऽन्यां विना शक्तिं सर्वां शक्तिं विना न किम् ॥

अथैकप्रत्ययो दृष्टस्तदेतद्बालजल्पितम् ।
न शक्तिप्रत्ययेऽप्येषा भासते तत् कुतः परा ॥

न शक्तिरितिबोधस्य विविक्ताकारसंगतिः[175] ।
अथापि व्यक्तिरस्येति व्यतिरेकोपलम्भनम् ॥

कायः शिलापुत्रस्येति व्यतिरेकगतिर्न किम् ।
न[176] स्वरूपावभासित्वे व्यतिरेकगतिः क्वचित् ॥

अथापि मन्त्रतन्त्रादेरग्नेः किं प्रतिपद्यते ।
यदि नास्ति परा शक्तिरग्निरूपे हि न क्षतिः ॥

तस्मादपैति यद्यस्मिन् सति तद् व्यतिरेकि[177] तत् ।
अन्यथा तस्य हानिः स्यात् कार्यं वा यत्ततो[178] न सत् ॥

/p. 21/

अर्थापत्तिः प्रमाणं चे[179] दन्योन्याश्रयता भवेत् ।
कल्पनामात्रमेवैतत् प्रमाणं केन तन्मतम् ॥

ननु शक्तिं विना कार्ये कारणानां ग्रहः कथम् ।

---

175 Ms. सङ्गतिः ।
176 Ms. नच ।
177 Ms. व्यतिरेक ।
178 Ms. मसत्ततो ।
179 Ms. चे अन्योन्या ।

अस्मात् कार्यं भवतु तद्व्यवहारोऽस्तु तावता ॥

कार्यार्थित्वादुपादानं[180] न शक्यार्थितया क्वचित् ।
अनेन सर्वशक्तीनां प्रत्याख्यातिरनिन्दिता ॥

तद्रूपदर्शनात् शक्तिव्यवहारः प्रसाध्यताम् ।
एवमन्योऽपि वृक्षादिर्व्यवहारस्य गोचरः ॥

स्वभावहेतुरेवं च नानुमानत्ववर्जनम् ।
कार्ये दर्शनतः शक्ति[181] व्यवहारः कुकृतः पुरा ॥

इहापि कार्यं दृष्ट्वैव[182] कार्यं दृष्ट्वैव व्यवहारः प्रसाध्यताम् ।
शब्दादर्थप्रसिद्धिश्च न संबन्धः[183] पुरा कृतः ॥

संकेताच्च प्रतीतिः सा कथं संबन्धसाधिका ।
संकेतो व्यञ्जकः शक्तेरन्वितस्य ध्वनेः सदा ॥

न संकेतसहस्रेऽपि प्रतिपत्तिरशक्तितः ।
कार्यकारणभावोऽयमेवमेवं सदा स्थितः ॥

तदा व्यञ्जनाभासत्वे[184] संकेतस्योपमा[185] कुतः ।
न च वाक्यार्थसंवित्तिस्तस्य संबन्धिता कुतः ॥

विकल्पे ननु संबन्धः कार्यकारणभावभाक् ।
तस्मान्न शब्दजा युक्ता सार्थापत्तिः सदर्थिका ॥

नैवार्थापत्तिजाप्येषा नित्यसंबन्धसाधिका ।
सांकेतितोऽपि संबन्धो नित्यकार्यस्य साधकः ॥

अनित्यत्वाद्विघातश्चेदन्यथा[186] दृश्यते न किम् ।
संकेतस्य परित्यागे[187] नैवार्थ[188] प्रत्ययः क्वचित् ॥

अभावपूर्विकाप्येषा नार्थापत्तिः प्रमान्तरम् ।
अभावोऽनुपलब्धि[189] त्वादनुमानात्परो न हि ॥

/p. 22/

न चार्थापत्तिरप्येषा बहिर्भावस्य साधिका ।
अनुमानमियं यस्मादेत[190] त्पश्चाद्वदिष्यते ॥

---

180 Ms. कार्याच्छित्वादुपाशनं न शक्यर्थि ।
181 Ms. शक्त ।
182 Ms. कार्यदृष्ट्वैव ।
183 Ms. न संबन्धः शक्तिक्षेपात् पुराकृतः ।
184 Ms. भासम ।
185 Ms. पता ।
186 Ms. चेत् अन्यथा ।
187 Ms. परित्यागो ।
188 Ms. नैवार्थः ।
189 Ms. लब्धत्वात् ।

पीनो दिवा न भुङ्क्ते वेत्येवमादि वचः श्रुतौ ।
रात्रिभोजनविज्ञानं कार्यं हेतोर्भविष्यति ॥

ननु वाक्यान्तर परि ज्ञाने कार्यहेतुरयं च कः ।
किं वाक्यान्तरकार्यत्वं [191] वाक्यस्य परमार्थतः ॥

पीनो दिवा न भुङ्क्ते वेत्येतद्वाक्यं श्रुतेः पुरा [192] ।
रात्रिभोजनवाक्यस्य गतिरस्ति परिस्फुटा ॥

तत्त्वेव [193] मुच्यते सद्भिर्भो [194] वक्रोक्तेरियं गतिः ।
वक्रोक्तिनिपुणो योऽन्यः स एवागच्छति ध्रुवम्
अन्यस्य तमभिप्रायमात्मवत् [195] परिगच्छतः ।
वाक्यान्तरविवक्षायामेतद्वाक्यप्रवर्त्तनम् ॥

यथा मम तदेवेत्येवमनुमानमतिः स्फुटा ।
कथं हेतुसमुत्पन्नमन्यथा तत्र हीयते ॥

या त्वभावोत्थिता कैश्चिदर्थापत्तिरुदाहृता ।
पक्षधर्मादिसद्भावा [196] न्न भिन्ना साऽनुमानतः ॥

बहिर्देशविशिष्टेऽर्थे देशे वा तद्विशेषिते ।
प्रमेयो यो गृहाभावस्तत्र धर्मः [197] स [198] निश्चितः ॥

यदि स नस्यात् स बहिर्भावो गृहे [199] ऽभावः कथं भवेत् ।
एवमव्यभिचारित्वं गृहसंबन्धवेदनम् ॥

तेन रूपत्रयप्राप्तेरनुमानं न संशयः ॥

धर्म्यत्र देवदत्तादि कुतश्चित् कार्यतो गतिः ।
बहिर्भावस्ततः कार्यात् प्रसिद्धो देशविभ्रमात् ॥

देशसामान्यसंबन्धादेव तत्राप्रसिद्धितः ।
अनुमानप्रसिद्धोऽपि धर्मी भवति कुत्रचित् ॥

अनुमानान्तरं तत्र यतो नैव विचार्यते ।
तदभावविशिष्टं हि गृहं धर्म्यत [200] एव हि ॥

/p. 23/

---

190 Ms. देह । दिह इति भवितुमर्हति ।
191 Ms. कार्यत्वम्वाक्यस्य ।
192 Ms. परा ।
193 Ms. तंत्रे च ।
194 Ms. र्भावक्रोक्ते ।
195 Ms. आत्मयत् ।
196 Ms. भावात् न ।
197 Ms. धर्म ।
198 Ms. सन्निश्चितः ।
199 Ms. गृहे भावः ।
200 Ms. धर्मोऽत एव हि ।

गृहाभावविशिष्टो हि तदासौ वचसो गतः ।
पूर्वं नैवागृहीतस्य धर्मिणो[201] ऽत्र प्रतीतता[202] ॥

तथा हि बाह्यदेशो वा चैत्रो वावगम्यते पुरा ।
जीवतो हि गृहाभावः पक्षधर्मोऽत्र कल्पितः ॥

तत्संवित्तिर्बहिर्भावं वाचो[203] बुद्ध्वा हि जायते ।
अग्निमात्रां विना यद्वत् धूमवत्ता[204] प्रतीयते ॥

न तद्ग्रहणवेलायामन्यधीनं[205] हि किंचन ॥

गेहाभावस्तु यः शुद्धो विद्यमानत्ववर्जितः ।
स मृतेष्वपि दृष्टत्वाद् बहिर्वृत्तेर्न[206] साधकः ॥

विद्यमानत्वसंसृष्टगेहाभावधियाऽत्र तु ।
गेहादुत्कालितश्चैत्रो[207] विद्यते बहिरेव हि ॥

जीवतस्तु गृहाभावः प्रसिद्धो यदि नेष्यते ।
अर्थापत्तिरपि प्राप्ता न प्रमाणं तथा सति ॥

स्थिते सद्भावविज्ञाने गेहाभावधियात्र तु ।
गेहादुत्कालिता सत्ता बहिरेवेत्यसद्वचः ॥

स्थिते सद्भावविज्ञाने नार्थापत्तेः प्रमाणता ।
जीवतो हि गृहाभावो यावत् सिध्येन्न[208] तत्त्वतः ॥

न तावता बहिर्भावः शक्यः कल्पयितुं परैः ।
येनात्र निरपेक्षस्य व्यभिचारो मृतादिना ॥

ननु यो व्यभिचारित्वं निरूप्येच्छति साधनम् ।
तस्यायं व्यभिचारोऽस्तु नानुमानमनिच्छतः ॥

यस्य त्वव्यभिचारित्वं साध्यादन्यन्न वाञ्छितम् ॥

जीवतो हि गृहाभावो यस्य सिद्धो न वादिनः ।
तस्य प्रत्य क्षतो गेहे चैत्राभावेऽप्यभावतः ॥

ज्ञाने यत् सत्त्वविज्ञानं तदेव न बहिः स्थितम् ।
सत्त्वविज्ञानमेवात्र स्वस्तिमात्रान्न[209] सिध्यति ॥

---

201 Ms. धर्मणो ।
202 Ms. प्रतीयता ।
203 Ms. वा वाचो ।
204 Ms. प्रमवत्ता ।
205 Ms. वेलायामत्याधीन ।
206 Ms. दृष्टत्वात् बहिर्वृत्तेन साधकः ।
207 Ms. गेहादुत्कलिततश्चैत्रो ।
208 Ms. सिद्धेन ।
209 Ms. मात्रान ।

/p. 24/

गेहाभावाद[210] सद्भावो नाभावाद्भावसाधनम् ।
अभावं साधयन्नेव स भावं साधयेत् कथम् ॥

प्रत्यक्षं साधयेद्भावं यथा भावं न साधयेत् ।
प्रत्यक्षमनुमानं च न भावे साधनं यथा ॥

विपर्ययस्य नैवात्र साधनत्वं विपर्यये ।
अभावेऽननुमानेन तत्सत्तैव समाश्रिता[211] ॥

अभावो भाव एवेति बहिर्भावो भवेद् यदि ।
अर्थापत्तेर्न सर्वत्रेत्येव[212] मन्योन्यसंश्रयः ॥

यावन्नाभावसंकोचस्तावदेषा न वर्त्तते ।
यावदेषानवर्त्तेताऽभावसंकोचिका कुतः ॥ ?

एतयैव भवेत्सआ चेत् संदेहोऽपि भवेत्क्वचित् ।
तस्माज्जीवित्व[213] संसिद्धेरर्थापत्तिः प्रसिध्यति ।
अर्थापत्तिप्रसिद्धौ[214] वा जीविता[215] ऽन्योन्यसंश्रयः ॥

पक्षधर्मात्मलाभाय बहिर्भावः प्रवेशितः ।
तद्विशिष्टोऽनुमेयः स्यात् पक्षधर्मान्वयोदितः ॥

पक्षधर्मादिविज्ञानं बहिःसंबोधतो यदि ।
तैश्च तद्बोधनेत्येवमन्योन्याश्रयता भवेत् ॥

अन्यथानुपपत्तौ तु प्रमेयानुप्रवेशिता ।
ताद्रूप्येणैव विज्ञानान्न दोषः प्रतिभाति नः ॥

उक्तमत्र यथात्रापि सोऽन्योन्याश्रयसंभवः ।
प्रमेयानुप्रवेशस्तु[216] न सिद्धः साधकः कथम् ॥

ताद्रूप्येणैव विज्ञानं किं तद्वचनमात्रकात् ॥

निर्विवेकस्याकल्पापि यदि नाम न[217] भासते[218] ।
दोषः किं तावता नास्ति तथाचेन्नाजितं जडैः ॥

समद्यमाननं[219] यस्य दौर्गन्ध्यं प्रतिभासते ।

---

210 Ms. भावामसद्भावो ।
211 Ms. सिसाश्रिता ।
212 Ms. सर्वत्रेत्येन ।
213 Ms. ज्जीवत्व ।
214 Ms. प्रसिद्धे ।
215 Ms. जीवंते ।
216 Ms. प्रमेयार्थानु प्रवेशस्तु ।
217 Ms.8 म ।
218 Ms. भाषते ।
219 Ms. मधमानं नमन्य

यदि किं तावता तत्र दौर्गन्ध्यस्य न संभवः ॥

/p. 25/

अविनाभाविता[220] चात्र तदैव यदि कल्प्यते ।
न प्रागवगतेत्येवं[221] सत्यप्येषा न कारणम् ॥

अविनाभावितैवात्र प्रागेव परिनिश्चिता ।
तदैवावगता[222] नेयमिति केन न कारणम् ॥

पूर्वदेशानवस्थान[223] मन्यदेशस्थितिं विना ।
न दृष्टमेकसामग्र्या … … …॥

दृष्टौहि समाजकालस्थौ नामग्रामौ[224] तुलात्तयोः ।?
गृहाभावबहिर्भावौ न [225] सापेक्षौ नियोगतः ॥

अन्या स्थाने प्रतीतिस्तु नियमेनैव जायते ।
प्रतीत्या सति[226] साहित्ये प्रमाणं किं[227] न विद्यते ॥

अन्यथानुपपत्त्यैव नैकेनान्यः[228] प्रतीयते ।
प्रत्यक्षानुमयोरेव[229] प्रामाण्यमिह विद्यते ॥

तथा न कल्प्यतेतच्चेत् साहित्यं किं[230] न सिध्यति ।
न च संबन्धवेलायां संबन्ध्यन्यतरो[231] ध्रुवम् ॥

अर्थापत्त्यावगन्तव्यः पश्चादस्त्यनुमानता ॥

योऽत्यन्तमन्त्रजडधीर्न विवेकभाजि,
तत्त्वे प्रवर्त्तनमुपैति न मे कथंचित् ।
अन्यस्य तस्य न जनआनुमतेर्विशेष-
स्तस्य स्वखलद्गतिः निवर्त्तनमेतदस्तु ॥

{प्रमाणान्तर्गतौ}[इति प्रमाणान्तर्गतौ] तृतीयोऽर्थापत्तिपरिच्छेदः ॥ छ ॥

---

220 Ms. भाविना ।
221 Ms. प्रागेवतेत्येवं ।
222 Ms. तदैवापगता ।
223 Ms. स्थानं अन्यदेश ।
224 Ms. नामी ग्रामौ ।
225 Ms. नापेक्षौ ।
226 Ms. सत ।
227 Ms. किन्न ।
228 Ms. नैकोनान्य ।
229 Ms. प्रत्यक्षानुमानयोरेव ।
230 Ms. किन्न ।
231 Ms. सन्ध्यतरो ध्रुवम् ।

# चतुर्तः परिच्छेदः

प्रमाणान्तरभावोऽपि

भाष्यकृ

त्प्रतिपादितः ।
अभावेऽपि[232] प्रमाभावो नास्तीत्येतद्विनिश्चये ॥

अर्थस्यासंनिकृष्टस्य[233] तथाचाह

कुमारिलः

।
भाष्यकारोक्तमेवार्थमुपपत्त्योपदर्शयन् ॥

/p. 26/

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता[234] ॥

वस्तुसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रिता समाश्रया ।
क्षीरे दध्यादि यन्नास्ति प्रागभाव◌ः स उच्यते ॥

नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम् ।
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ॥

शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः ।
शशश्रृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते ॥

क्षीरे दधि भवेदेव दध्नि"क्षीरं" घटे पटः[235] ।
शशे श्रृङ्गं[236] पृथिव्यादौ चैतन्यं मूर्त्तिरात्मनि ॥

अप्सु गन्धो रसश्चाग्नौ वायौ रूपं च तैः[237] सह ।
व्योम्नि संस्पर्शता वेति न चेदस्य प्रमाणता ॥

न च स्याद्व्यवहारोऽयं कारणादिविभागतः ॥

प्रागभावादिभेदेन नाभावो विभिद्यते यदि ।
न वा वस्तुन एभिः स्युर्भेदास्तेनास्य वस्तुता[238] ॥

कार्यादीनामभावः कार्यो भाव◌ः कारणादितः[239] ।

---

232 Ms. अभावोऽपि ।
233 Ms. सन्निकृष्स्यट ।
234 Ms. तत्र भाव प्रमाणात् ।
235 Ms. घटोपटः ।
236 Ms. शशश्रृङ्गं ।
237 Ms. वैः ।
वायौ रूपेण तौ सह
इति श्लोकवार्त्तिकपाठः ।
238 Ms. न चावस्तुन एतेस्युरिति श्लोकवार्त्तिकपाठः ।

यद्वानुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यदस्त्ययम्[240] ॥

तस्माद् घटादिवद्वस्तु प्रमेयत्वाच्च गृह्यताम् ॥

न चौप[241] चारिकं वात्र भ्रान्तिर्वापि यदृच्छया ।
भवत्यतो न सामान्यविशेषात्मकता वृथा ॥

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
{आत्मनो परिणामो वा}[आत्मनः परिणामो वा] विज्ञानं स्वान्यवस्तुनि ।
स्वरुपपररूपाभ्यां[242] नित्यं सदसदात्मके ॥

वस्तु विज्ञायते वस्तुनि ज्ञायते कैश्चिद् रूपं किंचित् कदाचन ॥

यस्य यत्र यदोद्भूतिर्जिघृक्षा वापि जायते ।
विद्यतेऽनुभवस्तस्य तेन च व्यपदिश्यते ॥

/p. 27/

तस्योपकारकत्वेन वर्त्तते[243] यस्तदेतरः ।
उभयोरपि संवित्त्वाद्[244] उभयावगमोऽस्त्विति ॥

प्रत्यक्षव्यवहारस्तु प्रत्यक्षाद्यवतारस्तु भावांशो गृह्यते यदा ।
व्यापारस्तदनुत्पत्तिरभावांशे जिघृक्षिते[245] ॥

न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः ।
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि ॥

ननु भावादभिन्नत्वात् संयोगो नाह्यस्ति तेन च ।
न ह्यत्यन्तमभेदोऽस्ति[246] रूपादिवदिहापि नः ॥

धर्माणां भेद इष्टो हि धर्म्यभेदे[247] ऽपि नः स्थिते[248] ।
उद्भवाभिभवात्मत्वाद् ग्रहणं वाऽवतिष्ठते ।
तत्संबन्धे सदित्येवं सद्रूपत्वं प्रतीयते ॥

नास्त्यत्रेद[249] मितीत्थं तु तत् तत्संयोगहेतुकम् ।
गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।

---

239 Ms. कारणादिनः कारणादिना इति च श्लोकवार्त्तिके पाठः ।
240 Ms. यद्स्त्वयम् ।
241 Ms. कारिकं ।
242 Ms. …स्वरूपाभ्यां ।
243 Ms. वर्त्तन्तेद्वस्तदेतरः ।
वर्ततेंशस्तदेतरः
इति श्लोकवार्त्तिके पाठः ।
244 Ms. संवित्तात् ।
245 Ms. रभुत्पत्तेरभायांशो जिघृक्षते ।
246 Ms. नह्यन्तत भेदोऽस्ति ।
247 Ms. धर्मभेदेऽपि ।
248 Ms. स्थितेः ।
249 Ms. नास्त्यत्वेद ।

मानसं नास्तिताज्ञानं जायतेऽक्षा[250] नपेक्षया ॥

मानं कथमभावश्चेत् प्रमेयं चात्र कीदृशम् ।
तत्र यो यदभावः[251] स्यान्मानमप्येवमिष्यताम् ॥

भावात्मके यथा माने नाभावस्य प्रमाणता ।
भावात्मकस्य मानत्वं नच राजाज्ञया स्थितम् ॥

परिच्छेदफलत्वेन[252] प्रामाण्यं स्याद् द्वयोरपि ॥

यदि चास्य प्रमाणत्वमभावत्वेन नेष्यते ।
वस्तुनः कारणत्वं हि दृष्ट[253] मित्यभिमानतः ।
नैव लिङ्गप्रमेयत्वे भवेतां[254] तद्वदेव हि ॥

तथा सति समस्तोऽपि व्यवहारो न सिध्यति ।
प्रमाणानामनुत्पत्तेर्न चाभावस्य धर्मता[255] ॥

/p. 28/

यत्राभावोऽस्ति तेनास्याः[256] संबन्धो नैव सिध्यति ।
नचा संनिहित[257] स्तत्र तस्य धर्मो भवेदयम् ॥

न च तस्य प्रमेयत्वं धर्मधर्मित्ववर्जनात् ।
{अभावे[258] नतु संबन्धो}[अभावे न तु सम्बन्धो] भवेत्तद्विषयत्वतः ॥

यज्ज्ञानाविषयत्वं च ज्ञाने मेयं न[259] विद्यते ।
संयोगसम[260] वायादिसंबन्धो नैव विद्यते ॥

नागृहीते च धर्मत्वं गृहीते सिद्धसाधनम् ।
अभावशब्दवाच्यत्वात् प्रत्यक्षादेव भिद्यते ॥

न प्रमाणमभावो हि प्रमेयाणामभावतः ।
भावोऽपि हि प्रमाणेन स्वानुरूपेण मीयते ॥

अभावस्य प्रमाणत्वं न प्रमेयाद्यभावतः[261] ।
अभावोऽपि प्रमाणेन स्वानुरूपेण मीयते ॥

---

250 Ms. अक्षा ।
251 Ms. योयद्भावः ।
252 Ms. पलत्वेन बलत्वेना ।
253 Ms. दृष्टि ।
254 Ms. भवेतान्तद्व ।
255 Ms. धर्मत्व ।
256 Ms. यत्र भावोऽस्ति तेनास्य ।
257 Ms.च सन्निहित ।
258 Ms. अभावेन तु ।
259 Ms. ज्ञान मेयेन ।
260 Ms. समता यादि° संबधौ धे ?
261 Ms. नाभावस्य प्रमाणत्वं तत्प्रमेयाद्यभावतः--इत्यपि पाठः सम्भवति ।

प्रमेयत्वाद्ध्यभावस्तु [262] तस्माद् भावात्मकात् पृथक् [263] ॥ इति ॥ छ ॥

अत्रोच्यते यथाऽभावो [264] न प्रमाणान्तरं मतम् ।
न हि स्वरूपं तस्यास्ति परतोऽनुपलब्धितः ॥

एकोपलम्भानुभवादिदं [265]
नोपलभे
इति ।
बुद्धेरुपलभे वेति कल्पिकायाः समुद्भवः ॥

उपलम्भनिषेधश्चेदेवमु [266] परिनिश्चितः ।
तस्मादनुपलम्भात्तु प्रमेयोऽ [267] भावनिश्चयः ॥

अत्रोच्यते, विविक्तस्य वेदनाद्धि स निश्चयः ।
तदन्यथावेति मतं यतः पक्षान्तरं न हि ॥

विविक्तस्यो [268] पलम्भाच्चेज् [269] ज्ञानभावस्य निश्चयः ।
विविक्तस्योपलम्भश्चेत् परतः सिद्धसाधनम् ॥

/p. 29/

स्वविविक्तोपलम्भात्तु नाभावस्य विनिश्चयः ।
नोपलम्भस्य संदेहे तदभावविनिश्चयः ॥

उपलम्भस्य भावश्चेत् सतस्तस्य निषिद्धता [270] ।
न ह्यन्यान्योपलभ्येषु [271] नास्तितानुपलम्भतः [272] ॥

न च सोऽनुपलम्भोऽपि प्रतिषेधान्यवस्तुनः ।
अभावे तु प्रमाणस्य प्रमेयं नेति तत्कुतः ॥

प्रमाणाभावोऽन्यथा नो चेदर्थापत्तिरियं सदा ।
न चार्थापत्तिरत्रास्ति नादृष्टं सर्वदैव न ॥

प्रमाभावे तु साध्ये स्यादभावः कोऽपरः प्रमा ॥

गृहीत्वा मानसं [273] भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं भवेत्पूर्वग्रहे सति ॥

---

262 Ms. भावस्तस्माद्धा° ।
263 Ms. पृथगिति ।
264 Ms. यथा भावो ।
265 Ms. एकोपलम्भानुभावा ।
266 Ms. सुपरि ।
267 Ms. प्रमेयो भावनिश्चयः ।
268 Ms. विविक्तास्यो° ।
269 Ms. चेत ज्ञानभावस्य ।
270 Ms. निषिद्धिहि ।
271 Ms. नह्यन्यान्युपलभ्येषु ।
272 Ms. नास्ति नानुपलम्भतः ।
273 Ms. मानसम्भावं ।

न चाभावः पुरा दृष्टो भावादेव हि मीयते ।
घटमानं पुरा दृष्टमिति चेत् तेन नास्ति तत् ॥

प्रामाण्या[274] भावसिद्धिश्चेत् प्रमेयाभावतः[275] , कथम् ? ।
प्रमाणाभावतश्चेत्त दर्थापत्तिर्भवेदियम् ॥

नियमश्च न तत्रास्ति पूर्वमेवोपपादितम् ।
एतदेव द्वयाभाव इति तत् साध्य साधनम् ॥

अन्योन्यतश्चेन्न भेदस्तथा सति भवेद् द्वयोः ।
सहोपलम्भनियमादभेद उपपादितः ॥

सहोपलम्भनियमादभेदोमानमेययोः ॥

सहोपलम्भनियमादेतयोस्तदभावयोः ।
अन्योपलम्भतो[276] वापि किमभावः प्रसिध्यति ॥

तद्विविक्तोपलम्भाच्चे[277] दर्थेनापि विविक्तता ।
प्रमाणभावसंसिद्धिः किमिदानीमनर्थिका ॥

अथ प्रमेयाभावेऽपि केवलग्रहणं भवेत् ।
प्रमाणान्तरभावे तु न केवलविदन्वयः ॥

/p. 30/

एवं प्रमाणाभावेऽपि मेयाभावो न सिद्धति ।
उपलब्धिलक्षणा[278] त्तत् समानमुभयोरपि ॥

तस्माद्विविक्ततामात्रमभावव्यपदेशभाक् ।
विधिकेन तु निर्देशः शीलापुत्रशरीरवत् ॥

तस्मादनादिसंसारव्यवहारप्रतीतितः ।
तद्विकल्पोदयादेव भावव्यवहृतिः परा ॥

नार्थाभावः प्रमाभावादपरः कश्चिदीक्ष्यते ।
तदन्यभाव एवात्र प्रमाभावः प्रमान्वितः ॥

अभावबुद्धिग्राह्यो यः सोऽभाव इति नैव सत् ।
अभावबुद्धिः किं काचिद्[279] रूपादि व्यतिरेकवित् ॥

यस्याभावोऽपरोऽसिद्धस्तस्य तद्वन्न सिध्यति ।
प्रमेयप्रतिभासेन स्फुटं बुद्धिः प्रसाध्यते ॥

---

274 Ms. प्रामाण्यभावः ।
275 Ms. प्रमेयाभावनितः ।
276 Ms. अन्योपलम्भावपि किमभावः प्रसिध्यति ।
277 Ms. चेत् अर्थेनापि ।
278 Ms. लक्षणादेतत् ।
279 Ms. काचित् रूपादि ।

अन्यथा सर्व एव स्या[280] दनायासेन वेदकः ।
तथासति पदार्थानां निर्णयः सुखसाधनः ॥

कुटकटेत्युच्यते सोऽयं कुटबुद्धौ चकास्ति नः ।
एवं घटादिभेदोऽपि परस्परविवेकतः ॥

न चकास्त्येव तद्भेदात् समानमुभयोरपि ।
अभावव्यवहारोऽयमिति चेदस्ति संगतः[281] ॥

व्यवहारमात्र[282] मेतत् तदन्यस्योपलम्भने ।
अभावेन विनान्यत्वमथ चेन्न प्रसिध्यति ॥

स्वकारणादसिद्धं चेत् तदभावात् कथं तथा ।
स्वकारणादेवसिद्धमभावात्तत्प्रतीयते ॥

स्वभावग्राहिणो[283] व्यक्तादसिद्धार्थात्कुतोऽन्यजः ।
अथ स्वरूपं भावान्न भिन्नं तन्नाप्यभेदवत् ॥

भेदाभेदावधियोगाद्[284] भेदाभेदवदिष्यते ।
भिन्ना इति परोपाधिरभिन्ना इति वा पुनः ॥

/p. 31/

भावात्मा वा प्रपञ्चोऽयं संसृष्टेष्वेव लक्ष्यते ।
अभावस्य स्वरूपेण यदि तावद्ग्रहः स्वतः ॥

स्वरूपेण प्रतीतस्य भेदकत्वं कथं मतम् ? ।
भेदकत्वात् प्रतीतिश्चेत् पृथग्भावोऽप्यथो भवेत् ॥

स्वरूपेण प्रतीतस्य भेदकत्वं किमुच्यते[285] ।
तदपेक्षो ऽस्य भेदकश्चेत् परभावो न किं तथा ॥

स्वरूपसमतायां चेद्[286] भावो न च भेदकः ।
न हि तस्यापि रूपेण प्रतीतेर्भेदकस्थितिः ॥

स्वरूपेण प्रतीतोऽपि भेदको नीलपीतवत् ।
न नीलपीतरूपेण स्वरूपादतिरिच्यते ॥

भेदकं च स्वरूपेण नेदं कर्त्तृत्वसंगमात् ।
अथ स्वरूपं तत्तस्य[287] कारणादेव जायते ॥

---

280 Ms. स्यात् अनायासेन ।
281 Ms. दङ्गतः ।
282 Ms. व्यवहारमात्रमेवैतत् ।
283 Ms. ग्राहिण्यो° ।
284 Ms. भेदाभेदादोयधियोगात् ।
285 Ms. मिमुच्यते ।
286 Ms. चेत् अभावो ।
287 Ms. त्ततस्य ।

सर्वत्र कारणादेव भेदाभावः परो वृथा ।
कारणादेव भवतीत्येतदप्यतिदुर्घटम् ॥

स्वकारणात् स्वयं जातः कथमन्यस्य भेदकः ।
दृश्यते भेदकत्वं चेत् ? दृश्यते दृश्यते यदि ॥ ?

पदार्थाद् दर्शनादन्योऽन्योऽ[288] त्रार्थ उपपद्यते ।
स प्रसज्यनिषेधो वा प[289] र्युदासोऽथवा भवेत् ॥

प्रसज्यप्रतिषेधे हि स एवार्थो न विद्यते ।
पर्युदासे हि सदृश[290] स्तदन्योऽर्थः प्रतीयताम् ॥

ततोऽस्त्यभावो न परः प्रमाणप्रतिपत्तिभाक् ।
अथाभावप्रतीतेर्यो विषयः स तथोच्यते ॥

सैवाभावप्रतीतिर्हि प्रसज्यादिविधा भवेत् ।
प्रमाणपञ्चकाभावः पर्युदासो न युज्यते ॥

न जायत इति प्रोक्तं नेदृशी पर्युदासता ।
पर्युदासेऽपि प्राप्तं यत् तदेवानुपलम्भनम् ॥

प्रमाणपञ्चकाभावात् पररूपेण नेयता ते ? ।
तद्वस्तु तत एवास्या◌ःसंकरः[291] पर्युदासतः ॥

/p. 32/

परभावो भवेदत्र यदि तद्रूपता भवेत् ।
अभावादेव तत्प्राप्ता वस्त्वसंकर[292] संस्थितिः ॥

प्रसज्यप्रतिषेधे[293] ऽपि वस्त्वसंकरता न किम् ।
स एवाभाव इति चेत् पर्युदासः परो यतः परोऽन्यतः ?
पर्युदासोऽपि नैवायं[294] पराभावं विना[295] कृतः ।
तस्यापि पर्युदासत्वे पराभावनिराकृतिः ॥

तत्रापीत्यनवस्थेयं कथं[296] नाम निवार्यताम् ।
प्रमाणस्यासमाप्तौ च प्रमेयस्यासमाप्तितः ॥

क्षीरे दध्यादि नास्तीति दध्यसंसृज्य[297] पाच्यते ।

---

288 Ms. दन्योन्याऽत्रार्थ ।
289 Ms. पुर्युदासो° ।
290 Ms. सदृशः तदन्योऽर्थः ।
291 Ms. °सङ्करः ।
292 Ms. सङ्कर ।
293 Ms. °प्रतिषेधोऽपि ।
294 Ms. नै वायं ।
295 Ms. विवा ।
296 Ms. कथन्नाम ।
297 Ms. दध्यसंसृष्टज्य ।

असंसृष्टं[298] हि तद्रूपं प्रत्यक्षादेव सिद्धिभाक् ॥

यदि नाध्य[299] क्षतः सिद्धिरभावादपि नो भवेत् ॥

यथा स्वरूपं तत्तस्य तदभावनिराकृतम् ।
तथा स्वरूपं तत्तस्य भावान्तरविनाकृतम् ॥

अभावग्रहणे तस्य निषेधो न प्रतीतिभाक् ।
भावान्तरस्याग्रहणे विविक्तत्वं प्रसिध्यति ॥

अयमेवेति यो ह्येष भावे भवति भवेन निश्चयः ।
नैष वस्त्वन्तराभावः संसिध्यत्यनुमामृते[300] ॥

वस्त्वन्तरत्वसिद्धौ हि तदभावावगतिर्भवेत् ।
अवधारणसिद्धौ च वस्त्वन्तरतया गतिः ॥

एवमन्यतरासिद्धौ[301] नैकस्यापि प्रसिद्धता ।
साधारणत[302] यार्थःस्याद् यदि नाध्यक्षगोचरः[303] ॥

अध्यक्षा[304] दन्वयगतौ नाभावोऽपि प्रतीतिभाक् ।
नहि तत्रैव तस्यैवाऽभावः[305] सिध्यति तत्त्वभाक् ॥

अवधारणमध्यक्षा[306] दित्यद्वयनिराक्रिया ॥

/p. 33/

गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽ[307] क्षानपेक्षया ॥

गृहीत्वा वस्तुसद्भावं यदि व्यावृत्तिसंगतम् ।
तदा तत्साध्वन्यथा नो व्यावृत्तिग्रहणं विना ।
वस्त्वसंकरसिद्धिर्या तत्प्रामाण्यसमाश्रिता[308] ॥

प्रतियोगिस्मृतिः सर्वा प्रतियोगिग्रहात्[309] सदा ।
प्रतियोगिग्रहोऽप्येष नाभावग्रहणाद्विना ॥

ततश्च चक्रक[310] प्राप्ते नैकमप्यत्र सिध्यति ॥

---

298 Ms. असृष्टं ।
299 Ms. नाव्यक्षतः ।
300 Ms. संवृसम्बत्यनुमाद्दते ।
301 Ms. वृद्धौ ।
302 Ms. साधारणतार्थस्य यदिनाव्यक्ष ।
303 Ms. नाव्यक्ष° ।
304 Ms. अव्यक्षा° ।
305 Ms. तस्यैवा अभावः ।
306 Ms. मव्यक्षा ।
307 Ms. ऽज्ञानपेक्षया ।
308 Ms. समाश्र्ता ।
309 Ms. ग्रहण सदा ।

अथाव्याकृतएवार्थो व्यावृत्तत्वेन मीयते ।
तर्हि तथाचायमिति दत्त एव जलाञ्जलिः ॥

अथापि स्यान्निषेधो यः प्रसज्यप्रतिषेधतः ।
स एवाभाव इष्टोऽत्र स चाभावः प्रमा ततः ॥

प्रसज्य[311] प्रतिषेधोऽयं, निवृत्तिः कस्य भण्यते ? ।
निवृत्तिस्तस्य, तस्मिंश्चाप्रतीते गम्यते कथम् ? ॥

प्रतीतेस्तन्निवृत्तिश्चेद्[312] अनिवृत्तिश्चेत् अनिवृत्तिश्च कीदृशी ।
अथापि या स्वतो दृष्टा [313] तदन्यत्र निषिध्यते ॥

तद्द्वयोरपि[314] दृश्यत्वे निषेधार्थः क उच्यते ।
व्यावृत्तेऽव्याकृतो दृष्टो निषेधः कीदृशोऽपरः ।
अव्यावृत्ते[315] तु न [316] दृष्टो निषेधः कस्य कुत्र वा ॥

निषेधस्य विधानं चेत् स भेदात्सर्वनष्टता ।
निषेधस्य विधानं चेददृष्टस्योपपत्तिमत् ॥

अन्तरालनियोगश्चे[317] दन्तरालं[318] कथं भवेत् ।
आकाशमन्तरालं तदतो भेदो न सिध्यति ॥

प्रागभावादिभेदेन संभवी कथमुच्यते ।
न शुद्धाकाशदेशस्य सर्वाभावसमानता ॥

/p. 34/

दध्यादिभेदाद्भेदश्चेत् तदसिद्धौ न सिध्यति ।
प्रागभावाप्रसिद्धौ च दध्युत्पत्तिः कथं भवेत् ? ॥

उत्पत्तिः[319] सिध्यते सा चेत्तदा, नास्ति तदा कथम् ? ।
नास्तिता पयसो दध्नि क्षीरात् सिद्धौ न सिध्यति ॥

प्राक् तस्य सिद्धिर्भूतेति तदाभावो न सिध्यति ।
अध्यारोपादभावश्चे[320] द्वस्तुभावो न सिध्यति ॥

तदाकारातिरेकेण न चाभावोऽस्ति भाविके ।
तस्याभावो बहिः स्याच्चेद्बहिः संवेदनं कुतः ? ॥

310 Ms. ततश्चक्कक ।
311 Ms. प्रसज्य प्रतिषेधोऽयं ।
312 Ms. श्चेत् ।
313 Ms. 2स्तदन्यत्र ।
314 Ms. तद्वयोरपि हि दृश्यत्वे ।
315 Ms. अव्यावृत्तेषु ।
316 Ms. नर्दृष्टो ।
317 Ms. अन्तरात्मनयोगश्चेत् ।
318 Ms. अनरालं ।
319 Ms. उत्पत्ते ।
320 Ms. श्चेत् वस्तु ।

दृष्टि [321] तस्येष्यते भावः केनादः संप्रतीयताम् ? ।
अभावेनेति चेत्तत्र त देवेदं विचार्यते ॥

प्रत्यक्षेण मया दृष्टो भाव इति न विद्यते ।
अभावेऽपि प्रतीतिश्चेत् पर्युदासे समाप्यताम् ॥

नचावस्तुन एते स्युर्भेदादित्यपि सांप्रतम् ।
वस्तुत्वं पर्युदासेन तद् [322] स्माभिर्न चेष्यते ॥

अथवा--

पारमार्थिकभेदत्वं न सिद्धं नः प्रमाणवत् ।
अपारमार्थिको [323] भेदो न वस्तुत्वस्य साधकः ॥

यद्वानुवृत्ति [324] व्यावृत्तिबुद्धिग्राह्य इतीरितम् ।
न घटादिवदेवास्मा [325] द्वस्तुत्वस्य प्रसाध्यता [326] ॥

सांख्यनैयायिकादीनां परस्परविरोधतः [327] ।
भावास्तथा प्रतीयन्ते किं तेषामपि वस्तुता ॥

तत्रौपचारिकत्वं वा भ्रान्तिर्वापि [328] यदृच्छया ।
न भवत्येव पूर्वोक्ते न भवेद् यदि --- ॥

प्रत्यक्षादेरनुत्पत्तिर्न प्रमाणान्तरात्परा ।
प्रत्यक्षान्तरतो वापि ततोऽस्यानुपलब्धिता ॥

स्वरूपपररूपाभ्यां वस्तुनः स्यात् परात्मकम् ।
स्वरूपेण हि सद्रूपं ततोऽन्या वा सदात्मता ॥

/p. 35/

ततः स्वरूपमेवास्य परव्यावृत्तिमीक्षते ।
यदि स्वरूपाद्व्यावृत्तमसदात्मकता वृथा ॥

अथाव्यावृत्तमेवेदमसदात्मकता कुतः ? ।
यदि तस्योपयोगित्वं [329] सर्वदा तत् प्रतीयताम् ॥

एकत्वे न वस्तुनस्तस्योद्भूतानुद्भूतते [330] कुतः ? ।
नानात्वे वस्तुनस्तस्य कस्मात्तदुभयात्मता [331] ॥

---

321 Ms. दस्येष्यते ।
322 Ms. तस्मास्माभि ।
323 Ms. अपारमार्थिकभेदो ।
324 Ms. व्यावृत्त ।
325 Ms. वास्मात् वस्तु त्वस्य ।
326 Ms. वस्तु त्वस्य प्रसाध्यताम् ।
327 Ms. विरोधिनो ।
328 Ms. °चारिकत्वंभ्रान्तिपूर्वापि यदृच्छ्या
329 Ms. योगात्पकथं ।
330 Ms. °स्तस्योद्भूतानुताभूते ।

जिघृक्षा यदि नाम ◌ः स्या[332] च्चक्षुः कात्स्न्यैं हि[333] तां विना ।
न केवलस्य ग्रहणे केनचिद् दृश्यते स्फुटम् ॥

तस्योपकारकत्वेन वर्त्तते यस्तदेतरः ।
उभयोरपि संवित्त्वा[334] दुभयानु[335] गमः कथम् ॥

उभाभ्यामपि संवित्तिर्न भवेदुभ[336] भावना ।
प्रत्यक्षाद्यवतारस्तु भावांशो[337] गृह्यते यदा ।
व्यापारस्तस्य भावांशो न भेदेन कथं भवेत् ॥

तद्योगादिन्द्रियेणैव नास्तीत्युत्पाद्यते मतिः ।
भावांशपर्युदासेऽपि ना[338] न्यत्राभाव उच्यते ॥

तदन्यत्वं कथं तस्य तद्विलक्षणभावतः ।
तद्वै[339] लक्षण्यमस्यापि देश[340] कालादिभावतः ॥

देशभेदादिना भेदो यद्यभावो वृथा भवेत् ।
देशादेरप्यभावेन विना भेदः कथं ततः ॥

अभावस्यापि भिन्नत्वे सैव स्यादनवस्थितिः ।
[341] अभावो यदि सर्वात्मनां भेद एव प्रसज्यते ॥

तद्रूपानुप्रवेशेन विना नैव परिस्फुटः ।
अनुप्रवेशो भावे हि भेदादन्या गतिः कुतः ॥

कथञ्चित्तस्य भावस्यानुप्रवेशो गतो यदि ।
अनुप्रवेशे[342] तद्रूपे प्रलये च न भेदिता ॥

/p. 36/

स्वेन रूपेण देशश्चेत् प्रवेशः स कथं मतः ।
पररूपेण देशश्चेन्न[343] तदान्येन वेशिता वेदिता ॥

पररूपेण सति कथं स्वभावो नतु भिद्यते ।
सोऽप्येकान्तं[344] न भिन्नश्चेत् तदेवावर्त्तते पुनः ॥

---

331 Ms. कस्मात्तस्योभयात्मता ।
332 Ms. स्यात् चक्षुः° ।
333 Ms. सितां ।
334 Ms. संवित्ता° ।
335 Ms. °दुभयोरनुगमः
336 Ms. °भवेदुभपभावना ।
337 Ms. भावांशो ।
338 Ms. न तदन्यत्राभाव ।
339 Ms. तद्वयै° ।
340 Ms. दशकालादि° ।
341 छन्दोभङ्गदोषः ।
342 Ms. 13 अनुवेशे° ।
343 Ms. देशश्चेत् न ।
344 Ms. प्येकान्तन्न° ।

धर्मयोर्भेद इष्टश्चेद्[345] धर्मभेदे[346] व्यवस्थिते ।
धर्मधर्मिव्यवस्थेयं भेदेऽ[347] सति कथं भवेत् ॥

समवायव्यवस्थायां पदार्थान्तरमेव हि ॥

गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनस्म् ।
मानसं नास्तिताज्ञानं जायतेऽक्षा[348] नपेक्षया ॥

अन्योन्यसंश्रयः प्रोक्तो जायतेऽ[349] क्षानपेक्षया ।
इत्यनिष्टमतो व्यक्तफलमेतदवस्थितम् ॥

वस्तुनः कारणत्वं हि नास्तीत्यत्रवि निश्चये ।
न लिङ्गत्वविनिर्मुक्तस्वभावात् कारण[350] स्थितिः ॥

केवलं प्रतिभासे हि तदभावे अन्य तदापि वित् ।
एतावन्मात्र निष्ठोऽयमभावस्य विनिश्चयः ॥

तथैव हि समस्तोऽयं व्यवहारः प्रसिद्धिभाक् ।
प्रमाणानामनुत्पत्तेस्तथा भावाभावधर्मता ॥ ?

केवलस्य प्रदेशस्य ग्रहणं साध्यसाधने ।
अभावोऽनुपलब्धिश्च केवलं प्रतिभासते ॥

अत्राभावेऽस्ति तेनास्याः संबन्धे धर्मधर्मिता ।
यो न [351] संनिहितस्तत्र तस्य धर्मस्य नेष्यते ॥

नैव तस्य प्रमेयत्वं तदभावस्य साधनात् ।
अभावेन हि सम्बन्धस्तस्य तादात्म्यलक्षणः ॥

अतस्तत्रतु तादात्म्याद्[352] व्यवहारस्य साध्यता ।
संयोग[353] समवायादिसंबन्धः केन नेष्यते ॥

/p. 37/

नागृहीतेऽस्ति धर्मत्वं गृहीतेऽ[354] थाप्यनर्थकम् ।
[355] अभावशब्दवाच्यत्वात् प्र[356] त्यक्षाद्भिद्यते कथम् ॥

---

345 Ms. इष्टश्चेत् ।
346 Ms. धर्मभेदो ।
347 Ms. भेदे सति ।
348 Ms. ऽपेक्षानपेक्षया ।
349 Ms. ऽज्ञा ।
350 Ms. कारणं ।
351 Ms. सन्निहित ।
352 Ms. दातात्म्यात् ।
353 Ms. संयोगः ।
354 Ms. गृहीतेष्वप्यनर्थकम् ।
355 Ms. स भाव° ।
356 Ms. पक्षादिभिद्यते ।

प्रमाणआ नामभावोहि प्रमाणेनासहस्थितेः ।
अभावो हि प्रमाणेन स्वानुरूपेण विद्यते ॥

प्रमेयत्वादभावो हि न[357] स्याद् भावात्म[358] कात् पृथक् ।
व्यवहारो भेदतः सिद्धसाधनं परमार्थतः ॥ ?

असिद्धिर्नहि तत्त्वेन भावाभावस्य भिन्नता ॥

इत्यद्भुता[359] ऽभावनिराक्रियेयं
प्रतीतिः संस्पर्शितया प्रबन्धात् ।
परीत्य[360] फल्गु स्फुरितं परेषां
सदर्थनीतेरयमेवसारः--॥

प्रमाणान्तर्भावः समाप्तः ॥ छ ॥ ठ

357 Ms. नास्याद् ।
358 Ms. भावात्मता ।
359 Ms. °द्भुता भाव ।
360 Ms. विपरीत्य ।